This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit. The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M 1983 विषय पुराण

नाव. कार्तिकमहात्म्य (जीर्णप्रत)

लेखक/लिपीकार ? पृष्ठ क्र १-४० गहाळ

पृष्ठ 44 काळ पिंगळसंवत्सर पूर्ण/अपूर्ण

M-1983

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प... राण्वंतरगत कार्तिक महात्म्यं

श्रीगणेशायनमः॥ ऋषयऊचुः॥ सूत पौराणिकश्रेष्ठ व्यासशिष्य महामते॥ आख्यानं कं चि
दाख्याहि श्रवणात्कामदंनृणां॥१॥ सूत उवाच॥ सम्यक्पृष्टमिदं ... प्रश्नः श्रीमद्भिः क्रियते द्विजाः॥
...त्तरं प्रवक्ष्यामि सर्वलोकोपकारकं॥२॥ श्रीमत्कार्तिकमाहात्म्यं श्रवणात्सौख्यदायकं॥ ...
सभामायैय सुराः कथितं द्विजाः॥३॥ द्वारकापुरा द्वारकायां राज्यं व्यासतियादवैः॥ ...
दृष्टुं श्रीकृष्णं लोकपालकं॥४॥ पारिजातप्रसूनं तद्यानं च सरातिगं॥ ... पतेहरस्त ...
प्य नारदस्य तदा हरिः॥५॥ गृहस्थधर्मसीमियं ये ... द्विजपूजनं॥ नारदं स्वकेरे ...
गृहमन्वगात्॥६॥ ...नच्चा मुनिं जगन्नाथ उपविश्य निजासने॥ विधिवत्पूजयामास स ...
संयुतः॥७॥ भैमीविनोदानुरतां तुष्टाव श्रीहरेः पुरः॥ मुनिः सर्वेषु गेहेषु कारुक्मिणीरुचिर...
॥८॥ नारद उवाच॥ हे कृष्ण लंज गैनोपावतीर्णो सि यदा कुलेनाद्य ... रैषे पंल ...
...॥९॥ ... धन्यास्मि ... स्त्री ... थं मान्या च धन्या च सर्वस्त्री...

लिनी॥३०॥तस्मादिदं मयानीतं कुसुमं नंदनोद्भवं॥ अर्पयिष्यामि विच्छत्रैव रुक्मिण्यै वर्षि
॥३३॥नारदस्य वचः श्रुत्वा भगवानप्युवाच तं॥ मुने यथार्थमेवाह रुक्मिणी सत्त्वने भवान्॥३
दनसंजातं कुसुमं भोक्तुमर्हति॥षोडशस्त्रीसहस्राणामग्रण्या च सुलक्षणा॥३४॥मम ... री
नित्यं स्वदुःखास्तु तिमर्हति॥३५॥सूत उवाच॥दास्यस्तु सत्यभामायास्तस्मिन्नवसरे स्थि... त्तु
१ त्वाथ त्वं तत्र मूर्च्छुस्ताः सत्यभामां यथातथं॥३६॥ततः क्रुद्धा सत्यभामा विसृज्याभरणा... दच्चा
कपाटं सुधापपर्यंका धौमहीतले॥३७॥समाजगाम भगवांस्तस्मिन्नवसरे प्रभुः॥३८॥कपाट
स मंगुल्याग्रेण ताडयामास सत्वरं॥३९॥उवाच सत्यां गुल्याकः कपाटं ताडयस्य हो॥नानाविनं दवा
क्येषु स्तामानं घोद्घाटयस्व यं॥४०॥निषसादासने रम्ये किंचित्सुमना अभूत्॥उवाच स सा क्रो
धस्य कारणं किं वद प्रिये॥४१॥येनापराद्धं ते कांते सं वा वद स सत्वरं॥ दंडयिष्याम्यथ वादास्ये तव
लोके पुण्यप्रिये॥४२॥ततः सोवाच तं ... प्रेक्ष्य म घमेमी सतीकथं॥सा किं यो विधिरेरस्त्वमहं किन

घमाहरे॥४३॥मैत्र्यां नारदगीतायां त्वया चाप्यनुमोदितम्॥पारिजातकपुष्पं च तस्या एव समर्पि
तं॥४४॥तस्मात्त्वाप्रियायां मे जीविते किं प्रयोजनं॥इति श्रुत्वा प्रियावाक्यं हरिः प्रोवाच सादरं॥४
प्रिये प्राणसमा त्वं मे षोडशस्त्रीसहस्रके॥त्वं तोष्येन नारदेनाथ पुष्पं दास्यामि नंदनं॥४६॥हरिवा
क्यमिति श्रुत्वा सत्यभामाब्रवीद्वचः॥ननु नादेरस्तु ते वीच्छा न पुष्पस्य हरे मम॥४७॥सर्वोसौ... दपे
क्षास्या यथा तद्विविधीयतां॥आरोपणीयः श्रीकृष्ण पारिजातो ममांगणे॥४८॥तथेत्युक्त्वा सभ
गवान्नरकं हंतुमुद्यतः॥तथा सहजगामाशु भौमस्थानं गरुत्मता॥४९॥हत्वा भौमे समस्तास्तु स्त्रीरत्ने
सहितां सुचां संपत्सु द्वारकायां वै प्रेषयित्वाशु गा सतिः॥द्वारकां गंतुमुद्युक्तो निषिद्धस्सत्यया तदा॥
॥५०॥उक्तवत्या पारिजातं विना गंतुं न शक्यते॥तदा तद्वचनादेव शक्रलोकं जगाम ... णी थे
न वचसेंद्रस्य याचयित्वा द्रुमोत्तमं॥तोभेन दानविमुखं वृध्वा सर्वेश्वरो हरिः॥५१॥ ... के
लरं प्रादात्स त्वा पारिजातोंप्रियः पतिः॥पराभूय सुरान्सर्वान् जगाम द्वारकां प्रति॥५२॥सत्य...

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२

णपारिजातमारोपयस्थली॥एतस्मिन्समयेविप्रामुनिर्नारदआययौ॥३२॥सत्यभाम
योभगवांस्तमपूजयत्॥हर्यग्रेनारदः ~~प्राणवल्लभेयोषिदुत्तमे~~ मम सत्यभामांस्तोतुंप्रचक्र
स्तुस्यातुष्टांसत्यभामांनारदःप्राहसादरं॥सत्यभामेहरेःप्राणवल्लभेयोषिदुत्तमे॥३३॥सत्य
वीणिदानानिदत्तानिवरवर्णिनि॥एकेनाचरितेदानेतत्कुरूष्वहरिप्रिये॥३४॥पारिजातेन
तंकृष्णदानंमहाफलं॥तत्कुरुष्वाशुसंसेव्यदीयसेमहाफलं॥३६॥मुनेर्वीक्ष्यतदाश्रुत्वा
स्याप्यलोकयत्॥इच्छानुमोदितासाच्चीनारदायमहात्मने॥३७॥बहुकांचनमुक्ताढ्यंपारिजात
युतंहरिं॥प्रददौबहुसंतुष्टास्त्रीसंघेसंनिरीक्षति॥३८॥प्रतिग्रहेगृहितेतुनारदेनमहात्मना॥
नारदःइत्युमाहेदंमासनंचकमंडलुं॥गृहीत्वायाहिमत्साकंमधिष्यत्त्वमुपागतः॥३९॥हरिःश्रु
त्वामुनेर्वीक्ष्यमासनंचकमंडलुं॥कृष्णायांसमुपादायजगामाचतुनारदं॥४०॥हरिंसदनुगंदृ
ष्ट्वाखिन्नासत्साहनारदं॥मुनेत्वद्दूचसादानंकृतंविश्वस्तयामया॥४१॥इदानींजीवनंत्वंमेकथं

नयसिनिष्ठुर॥हरिंविनासजेस्त्राणानेवंतांवदतींमुनिः॥४२॥भामेचिंतांमाकुरुथास्त्वंदत्स्वस्याप्यै
तुल्यममा॥दत्वास्वर्णस्यकांतंत्वंमोचयित्वासुखंलभ॥४३॥श्रुत्वैवंनारदवचःसत्यभामातथाकरोत॥
किंचिन्न्यूनेतुलाकांटेरुक्मिणीतुलसीमदात्॥४४॥ससौस्तुत्वाशिषोदत्वाद्दत्वंनत्वाययौमुनिः॥
सत्यभामागृहेकृष्णश्चक्रीडेजस्वलाःकथाः॥४५॥ छ॥ इतिश्रीपद्मपुराणेकार्तिकमाहात्म्येपारि
जातकुसुमकथानामप्रथमोध्यायः॥१॥छ॥ ॥छ॥ ॥अथयःपतिमथामंत्र्यगतेदेवर्षिसत्तमे॥
हर्षोत्फुल्लमनाःसत्यावासुदेवमथाब्रवीत्॥१॥सत्यभामोवाच॥धन्यास्मिकृतकृत्यास्मिसफलंजी
वितंमम॥मज्जन्मनिनिदानेचधन्यौतौपितरौमम॥२॥यौमांत्रैलोक्यसुभगांजनयामासतुःप्रभु
वम्॥षोडशस्त्रीसहस्राणांवल्लभाहंयतस्तव॥३॥यस्मान्मयादिपुरुषःकल्पवृक्षसमन्वितः॥य
योक्तविधिनासम्यक्नारदायसमर्पितः॥४॥यद्वार्त्तामपिजानातिभूमिसंस्थानजंतवः॥ क
ल्पद्रुमोगेहेममतिष्ठतिसांप्रतं॥५॥त्रैलोक्याधिपतेश्चाहंश्रीपतेरपिवल्लभा॥अतोहं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

छामि किंचित्त्वां मधुसुदन॥ ६॥ दीनाय दित्वं मत्प्रियकरः कथयस्वात्र विस्तरात्॥ श्रुत्वा स पुनश्चाह करो
२ मि हितमास्सनः॥ ७॥ यथा कल्पं त्वया देवि विमुक्ता स्यां न कर्हिचित्॥ ८॥ श्रीसूतउवाच॥ इति प्रियावच
श्रुत्वा स्मेरास्यः सवल्लभाग्रजः॥ सख्याः करेकरं धृत्वा गमत्कल्पतरोस्तले॥ शाखिनि विष्ण्वानुचरैर्लोके
स विलासप्रियान्वितः॥ प्रहस्य स सखामामंत्र्य प्रोवाच जगतांपतिः॥ ९॥ लक्ष्मि तिपरिखा सेवकस्य सु तो ४
लकितां गकः॥ १०॥ कृष्ण उवाच॥ न मे त्वत्तः प्रियतमा काचिदन्या नितंबिनी॥ ११॥ षोडशस्त्रीसहस्राणां
प्रिये प्राणसमा त्वमसि॥ त्वदर्थे देवराजोपि विरुद्धो दैवतैः सह॥ १२॥ त्वयायेत प्रार्थितं कालेस्थणु
यच्छ्रम हृद्वेत्॥ अदेयमथवाकार्यमकथ्यमपि यत्सुनः॥ यत्करोषि कथं प्रश्नं कथयामि तव
प्रिये॥ तस्य च्छ सर्वं कथये यत्ते मनसि वर्तते॥ १३॥ सत्योवाच॥ दानं व्रतं तपश्चापि किंतु पूर्वं कृतं म
या॥ येनाहं मर्त्यजा मर्त्यभावातीता भवं किल॥ १४॥ सर्वांगार्धहरा निसंगक्रीडासनगामिनी॥ इन्द्रा
दिदेवतानां समेगामं यत्त्वयासह॥ १५॥ अतस्त्वां परिपृच्छामि किं कृतं तु मया प्रभो॥ भवांतरे च किं

नीलाकाचाहं कस्यकन्यका॥ १६॥ श्रीकृष्ण उवाच॥ शृणुष्वैकमना कांते यथा त्वं पूर्वजन्मनि॥ पुण्यात्व्रतं व
तवती तत्सर्वं कथयामि ते॥ १७॥ आसीत्कृतयुगस्यांते मायापुर्यां द्विजोत्तमः॥ आत्रेयो वै देवशर्मेति
वेदवेदांगपारगः॥ १८॥ अतिथेयाग्निशुश्रुषी सौरव्रतपरायणः॥ सूर्यमाराधयन्नित्यं साक्षा
त्सूर्य इवापरः॥ १९॥ तस्यातीववयस्यासीन्नाम्ना गुणवती सुता॥ अपुत्रः स स्वशिष्याय चंद्रना
म्ने ददौ सुतां॥ २०॥ तमेव पुत्रवन्मेने स च तं पितृवद्वशी॥ तौ कदाचिद्वनं यातौ कुशाद्याहरणार्थि
नौ॥ २१॥ हिमाद्रिपाजवने चरतु स्तावितस्ततः॥ तावत्तौ राक्षसं घोरमासायांतमपश्यतां॥ २२॥
भयविकलसर्वांगाव समर्थौ पलायुतं॥ निहतौ राक्षसा तेन घ्नतां तस मरूपिणा॥ तौ तत्सेवप्र
भावेन धर्मशीलतया पुनः॥ वैकुंठभवने नीतौ मद्गणैर्मत्समीपगैः॥ २३॥ यावज्जीवेतु तेसा
भ्यां सूर्यपूजादिकं कृतं॥ तेनाहं कर्मणा ताभ्यां सुप्रीतोहं भवं किल॥ २४॥ सौराः शैवा गाणपत्या
शावैष्णवाः शाक्तिपूजकाः॥ मामेव प्राप्नुवंतीह वर्षाः सागरं यथा॥ २५॥ एकोहं पंचधा जातः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

६ उयानामभिः किल॥ देवदत्तोयथाकश्चित्सुत्राघाख्याननामभिः॥ २०॥ ततश्चैतौ मन्दवनाधिवासिनो
रविवर्चसावुभौ॥ मत्तुल्यरूपौ मम सन्निधानगौ दिव्यांगनाचंदनभोगभोगिनौ॥ २८॥ ॥ छ॥
॥ ॥ इति श्रीपद्मपुराणे कार्तिकमाहात्म्ये सत्यभामासंवादो नाम द्वितीयोऽध्यायः॥ २॥ ॥ छ॥ श्रीकृ
ष्ण उवाच॥ ततो गुणवती श्रुत्वा रक्षसा निहतावुभौ॥ पितृभर्तृजं दुःखात्ती करुणं पर्यदेवयत्॥ १॥
गुणवत्युवाच॥ हा नाथ हा पितस्त्यक्त्वा गच्छतं क्व मया विना॥ वालाहं किं करोम्यद्य स्वनाथा भवतोर्वि
ना॥ २॥ को नु मामाश्रितां गेहे भोजनाच्छादनादिभिः॥ अकिंचिज्ज्ञां कुशीलां स्त्रे हा तु पालयत्यतिदुःखितां
॥ ३॥ हतभाग्या हतसुखा हतनाथा हतजीविता॥ शरणं कं प्रयाम्यद्य यो मे दुःखं प्रमार्जयेत्॥ ४॥ क्व या
स्यामि क्व तिष्ठामि किं करोमि यथा घृणम्॥ विधात्रा हा हतास्म्यद्य कथं जीवामि बालिशा॥ ५॥ श्रीकृ
ष्ण उवाच॥ एवं बहु विलप्याथ कुररीव भृशातुरा॥ पपात भूमौ विकला रंभा वालहता यथा॥ ६॥ चि ६
रादाश्वस्य सा भूमौ विलप्य करुणं बहु॥ निमग्ना शोकजलधौ दुःखिता सम वर्तत॥ ७॥ सा गृहोपस्का

रान्सर्वान्विक्रीयाशुभकर्म च॥ तयोश्चक्रे यथाशक्ति पारलौक्यां तदा क्रियां॥ ८॥ तस्मिन्नेव पुरे चक्रे
वासं प्रभृतजीविनी॥ विष्णुभक्तिरता शांता सत्यशौचादितत्परा॥ ९॥ व्रतद्वयं तथा सम्यगाजन्ममर
णाद्धृतं॥ एकादशीव्रतं सम्यक्सेवनं कार्तिकस्य च॥ १०॥ एतद्व्रतद्वयं कांते मम प्रीतिविवर्धकं॥ भुक्ति
मुक्तिप्रदं पुण्यं पुत्रसंपत्तिदायकं॥ ११॥ कार्तिके मासि ये नित्यं तुलासंस्थे दिवाकरे॥ प्रातः स्नास्यंति
ते युक्ता महापातकिनोपि हि॥ १२॥ स्नानं जागरणं दीपं तुलसीवनपालनम्॥ कार्तिके ये प्रकुर्वंति ते
रा विष्णुमूर्तयः॥ १३॥ संमार्जनं विष्णुगृहे स्वस्तिकादिनिवेदनं॥ विष्णुपूजां च ये कुर्युर्जीवन्मुक्तास्तु ते
नराः॥ १४॥ इत्थं दिनत्रयमपि कार्तिके ये प्रकुर्वते॥ देवानामपि ते वंद्याः किं तैराजन्मनः कृतं॥ १५॥ श्री
कृष्ण उवाच॥ इत्थं गुणवती सम्यक्कुर्वन्ती सुव्रतिनी सा भूत्॥ नित्यं विष्णुपरिकर्म तत्परा न सा॥
॥ १६॥ कदाचित्सा रुजानाथा क्षांगी ज्वरपीडिता॥ स्नातुं गंगां गता कांते कथंचिद्धनके सदा॥ १७॥ या
वज्जलांतरगता कंपतीशीतपीडिता॥ तावत्सा विह्वला पश्यद्विमानं यात संवरी॥ १८॥ शंखचक्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

८

गदापद्महस्तैरासीनमंबरात्॥ विष्णुरूपधरैः सम्यग्वैनतेयध्वजांकितैः॥ १९॥ आरोह्य पद्मिमानेनं तामप्सरोगणसेवितां॥ चामरैर्वीज्यमानां वैकुंठं मद्गणा नयन्॥ २०॥ अथ सा मद्विमानस्थाज्वलदग्निशिखोपमा॥ कार्तिकव्रतपुण्येन मत्सांनिध्यंगता भवत्॥ २१॥ अथ ब्रह्मादिदेवानां यथा प्रार्थनया भुवं॥ आगतोहं गणाः सर्वे याता स्तेपि मया सह॥ २२॥ एते हि यादवाः सर्वे मद्गणा एव भामिनि॥ पिता ते देवशर्मा सोप्ययं सत्राजिदभिधो स्वयं॥ २३॥ यश्चंद्रनामा सोक्रूरस्त्वं गुणवती शुभा॥ कार्तिकस्नानपुण्येन बहु मत्प्रीतिदायिनी॥ २४॥ मद्द्वारि यत्त्वया पूर्वं तुलसीवाटिका कृता॥ तस्मादयं कल्पवृक्षस्तवांगणगतः शुभे॥ २५॥ कार्तिके दीपदानं च यत्कृतं तु त्वया पुरा॥ त्वद्देहगेहे संस्थेयं तस्मात्लक्ष्मीः स्थिरा भवत्॥ २६॥ यच्च व्रतादिकं सर्वं विष्णवे मत्स्वरूपिणे॥ निवेदितवती तस्मान्मम भार्या च माता गो॥ २७॥ आजन्ममरणं सूर्वं यत्कार्तिकव्रतं कृतं॥ कदाचिदपि तेन त्वं मद्वियोगेन यास्यसि॥ २८॥ एवं ये कार्तिके मासि नरा व्रतपरायणाः॥ मत्सांनिध्यंगता स्तेपि प्रीतिदा स्त्वं यथा मम॥ २९॥ यज्ञदानव्रततपःकारिणो मानवाः

खलु॥ कार्तिकव्रतपुण्यस्य नाप्नुवंति कलामपि॥ ३०॥ इत्थं निशम्य भुवनाधिपतेस्तदानीं प्राग्जन्मपुण्यभववैभवजातहर्षा॥ विश्वेश्वरं त्रिभुवनेकनिदानभूतं कृष्णं प्रणम्य वचनं निजगाद सत्या॥ ३१॥ ॥ इति श्रीपद्मपुराणे कार्तिकमहात्म्ये कृष्णसत्यभामासंवादे सत्योत्पत्तिर्नाम तृतीयोध्यायः॥ ३॥ ॥ सत्यभामोवाच॥ सर्वेपि काला वयवास्तव कालस्वरूपिणः॥ समानोस्तु कथं नाथ मासानां कार्तिको वरः॥ १॥ एकादशी तिथीनां च मासानां कार्तिकप्रियः॥ कुतो वै देवदेवेश कारणं किं च कथ्यतां॥ २॥ श्रीकृष्ण उवाच॥ साधु पृष्टं त्वया कांते शृणु ष्व कामिमानसा॥ पृथोर्वैन्यस्य संवादं महर्षेर्नारदस्य च॥ ३॥ एवमेव पुरा पृष्टो नारदः पृथुना तदा॥ उवाच कार्तिकाधिक्यं कारणं सर्वविन्मुनिः॥ ४॥ नारद उवाच॥ शंखनामाभवत्पूर्वं मसुरः सागरात्मजः॥ त्रिलोकीमथनः शश्वन्महाबलपराक्रमः॥ ५॥ जित्वा देवान्निराकृत्य स्वर्लोकात्स महासुरः॥ इंद्रादिलोकपालानामधिकारांस्तदाहरत्॥ ६॥ तद्भयादथ ते देवाः सुवर्णाद्रिगुहां गताः॥ न्यवसन्बहुवर्षाणि सावरोधाः सवासवाः॥ ७॥ स तु वर्णाद्रिगुहादुर्गसं

८

श्रितास्त्रिदशाय दा ॥ तद्वाणीनो बभूवुस्ते तदा दैत्योपि चारयत् ॥ ८ ॥ हताधिकारास्त्रिदशा मयाद्य पिनि
र्जिता ॥ लक्ष्यं ते बलयुक्तास्तु करणीयं मया त्रिकं ॥ ९ ॥ अज्ञात्वा तु कथं देवा देव मंत्र बलान्विता ॥ तान्
हरिष्ये ततः सर्वे बलहीना भवंति वै ॥ १० ॥ इति मत्वा ततो दैत्यो विष्णुमालक्ष्य निद्रितं ॥ सत्यलोकाज्जहा
राशु वेदांस्तान् स स्वयंभुवः ॥ ११ ॥ नीतास्तु तेन ये वेदास्तद्रूयांस्ते निराक्रमन् ॥ तोयानि विविशुर्यज्ञ मंत्र बी
जसमन्विता ॥ १२ ॥ तान्मार्गमाणः शंखोपि समुद्रांतरतो भ्रमन् ॥ नददर्श तदा दैत्यः क्वचिदेकत्र संस्थि
तान् ॥ १३ ॥ अथ ब्रह्मासुरैस्सार्द्धं विष्णुं नारायणं मन्वियात् ॥ पूजोपकरणानि गृह्य वैकुंठ भवनं गतः ॥ १४ ॥
तत्र तस्य प्रबोधाय गीत वाद्यादिकाः क्रियाः ॥ चक्रुर्देवास्तथा गंध धूप दीपान्मुहुर्मुहुः ॥ १५ ॥ अथ प्रबुद्धो
भगवान् तद्भक्ति परितोषितः ॥ ददृशे तैः सुरैः सार्धं सहस्रार्क सम द्युतिः ॥ १६ ॥ उपचारैः षोडशभि
स्तं पूज्य त्रिदशास्तदा ॥ दंडवत्पतिता भूमौ तानुवाचाथ माधवः ॥ १७ ॥ श्रीकृष्णोवाच ॥ वरदोहं सुराः ए
गीत वाद्यादि मंगले ॥ मनोभिलषितान् कामान् सर्वानेव ददामि वः ॥ १८ ॥ वृषस्य शुक्लैकादश्यां या व(?)बुद्धौ ८

धिनी भवेत् ॥ निशान्तु र्यश्च घोषे ये गीत वाद्यादि मंगलान् ॥ १९ ॥ कुर्वंति मि समन्तु जाभ वन्दि र्यथा
स्थ(?)लं तात्मत्प्रीतिकरा निसंमत्सां निध्ये ब्रजंति हि ॥ २० ॥ पाद्याघ्यचमनीयादि यन्द(?) वह्निरूढा तते ॥ तदमुत
गुणं तस्मान्जातैर्वो सुख कारणं ॥ २१ ॥ वेदाः शंख हताः सर्वे तिष्ठंसुदके संस्थिताः ॥ तानानयाम्यहं सर्वान्
हत्वा सागरनंदनं ॥ २२ ॥ अद्यप्रभृति देवास्तु मंत्र बीज समन्विताः ॥ प्रसन्नकार्तिके मासि विप्रमं स्यसु
सर्वदा ॥ २३ ॥ मत्स्यरूपोहमपि चाभ्युवामि जलमध्यगः ॥ भवतोपि मया सार्धमायांतु समुनीश्वराः ॥ २४ ॥ का
र्त्तिके स्मिन् येपि कुर्वंति प्रातःस्नानं नरोत्तमाः ॥ ते सर्व यज्ञावभृथैः सुस्नातास्युर्न संशयः ॥ २५ ॥ ये कार्तिक
व्रतं सम्यक्कुर्वंति मनुजाः सदा ॥ ते देहांते त्वया क्रेशं प्राप्याम स्थवनं सदा ॥ २६ ॥ विघ्नेभ्यो रक्षणं तेषां तथा
कार्यं मया त्वया ॥ देयास्त्वया च वरुण पुत्र पौत्रादि संततिः ॥ २७ ॥ धनवद्धि धनाध्यक्षस्तथा कार्यास्मि मोक्ष
या ॥ मम रूपधरः साक्षात्स जीवन्मुक्तो न संशयः ॥ २८ ॥ आजन्म मरणाद्येन हतमेतद्व्रतोत्तमं ॥ यथोक्त वि
धिना सम्यक् समान्यो भवतामपि ॥ २९ ॥ एकादश्यांयतश्चाहं भवद्भिः प्रतिबोधितः ॥ अतश्चैषा तिथिर्मा

८

न्यासातीवप्रीतिर्दाममा॥३॥अत्रतद्वयंसम्यगिदंनरैः रक्षेसांनिध्यरूनेनतभाम्यदस्ति॥दत्तानितीर्था
नितपांसियज्ञाःस्वर्लोकदान्नेवसदासुरोत्त–मा॥३३॥ ॥इतिश्रीपद्मपुराणेका० ह्छसभामासे
वाद्येचतुर्थोध्यायः॥४॥ ॥छ॥ ॥छ॥ ॥नारदउवाच॥इत्युक्त्वाभगवान्विष्णुः शफूरीरूतुपल्व्यधृ
क्॥स्वासपातांजलौविंध्यवासिनःकस्यपस्यच॥१॥मत्स्यंकमंडलौक्षिप्त्राक्षिमवान्रूपयामुनिः॥लावे
त्सनममौतत्रततःकूपेन्यवेशयत्॥२॥तत्रापिनममौतावत्कासारेप्रापयत्ससतं॥एवंससागरेक्षिप्त
स्तत्रमत्स्योविवर्धत॥३॥ततोवधीत्सतंशंखंविष्णुर्मत्स्यस्वरूपधृक्॥अथतेसकेरधृत्वावदरीवनमा॥
मत्॥४॥तत्राहूयऋषीन्सर्वानिदमाज्ञापयद्विभुः॥श्रीहरिरुवाच॥जलांतरंविशीर्णास्तुयूयंवे
दान्समार्गथ॥५॥आनयध्वंत्वरिताश्चसहेरस्यान्जलांतरात्॥नावस्त्रयागेतिष्ठामिदेवर्षिगणसं
युतः॥नारदउवाच॥ततस्तेस्सर्वमुनिभिस्तपोबलसमन्वितैः॥उद्धारिताःसवीजास्तेवेदायज्ञसमन्वि
ता॥७॥तैस्तुयावन्मितेयेनलब्धंतावन्मितस्यहि॥सएवऋषिर्जातस्तदाप्रभतिपार्थिव॥८॥अथ

सर्वेपिसेगम्यप्रयागंमुनयोययुः॥विछवेसविधात्रेतेलब्धान्वेदान्यवेदयन्॥९॥लब्धान्वेदान्सयज्ञांस्तुब्र
ह्माहर्षसमन्वितः॥अयजद्वाजिमेधेनदेवर्षिगणसंयुतः॥१०॥यज्ञांतेदेवगंधर्वयक्षपन्नगगुह्यकाः॥
निपसदंडवन्नमौविज्ञप्तिंतत्रचक्रिरे॥११॥देवाऊचुः॥देवदेवजगन्नाथविज्ञाप्तिंशृणुनःप्रभो॥हर्षे
कालोयमस्माकंतस्मात्वंवरदोभव॥१२॥स्थानेस्मिन्द्रुहिणोवेदान्नष्टान्प्राप्यपुनःस्वयं॥यज्ञभागांश्च
यंप्राप्तास्त्वत्प्रसादात्रमापते॥१३॥स्थानमेतदतःश्रेष्ठंब्रह्मघ्नादिविशुद्धिकृत्॥दत्ताक्षयकरं॥चास्तुवरस्मे
नेददस्वनः॥१४॥श्रीविष्णुरुवाच॥ममाप्येतंमतंदेवायस्त्वदविज्ञिरूपहृतं॥तसथास्तुभवेत्तद्भूत्वेति
त्रमितिप्रियं॥१५॥सूर्यवंशोद्भवोराजाभगीगामत्रानयिष्यति॥संसोर्मकन्ययाचात्रकालिंद्यासंगमेष्य
ति॥१६॥यूयंचसर्वेब्रह्माद्यानिवसध्वंमयासह॥तीर्थराजेतिविख्यातंतीर्थमिसम्भविष्यति॥१७॥
दानंतपोव्रतंहोमोजपःपूजादिकाःक्रियाः॥अनंतफलदाःसंतुमत्सांनिध्यकराःसदा॥१८॥ब्रह्महत्यादि
पापानिसप्तजन्मार्जितान्यपि॥दर्शनादस्यतीर्थस्यविनाशंयांतितत्क्षणात्॥१९॥देहत्यागंतभाधीराः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

६

कुर्वंति मम संनिधौ ॥ मत्तनुं प्रविशंत्येव न पुनर्जन्म ते नराः ॥ २० ॥ पितरस्तु हि च्छंत्येयेश्राद्धं कुर्वंत्यत्र मम मासतः ॥ ति
लापि तृगणाः सर्वे यांति ते मम सलोकतां ॥ २१ ॥ कालोप्येष महापुण्यः फलदोस्तु सदा नृणां ॥ सूर्ये मकरगे प्रातः स्ना
यिनां पापनाशनं ॥ २२ ॥ मकरस्थे रवौ माघे प्रातः स्नानं प्रकुर्वतां ॥ दर्शनादेव पापानि यांति सूर्याद्यथा तमः ॥
॥ २३ ॥ सलोकत्वं समीपत्वं सारूप्यत्वं त्रिभिः क्रमात् ॥ नृणां ददाम्यहं स्नानेर्माघे मकरगे रवौ ॥ २४ ॥ यूयं च मुनी
श्वराः सर्वे शृणुध्वं वरदोस्मि वः ॥ बदरीवनमध्येहं सदा तिष्ठामि सर्वगः ॥ २५ ॥ अन्यत्र दशाभिर्वर्षैस्तपसा
वाप्यते फलं ॥ तत्र तद्दिवसेकेन भक्तिमद्भिः प्राप्यते सदा ॥ २६ ॥ स्थानस्य दर्शनं तस्य ये कुर्वंति नरोत्तमाः ॥
जीवन्मुक्तास्सदा तेषु पापं नैवावतिष्ठति ॥ २७ ॥ सूत उवाच ॥ एवं देवा नदेवदेवस्तत्कालतश्चैवांतर्धानमगा
त्सवेधा ॥ देवाः सर्वेप्यंसकैस्तत्र तिष्ठन्नंतर्धानं प्रापुरिंद्रादयस्ते ॥ २८ ॥ माघाम्येमायः शृणुयान्नरोत्रयः
श्रावयेद्वापि विशुद्धचेताः ॥ स तीर्थराजं बदरीवनं तद्गत्वाफलं तत्समवाप्नुयाच्च ॥ २९ ॥ ॥छ॥ इति श्री
पद्मपुराणे कार्तिकमाहात्म्ये कृष्णसत्यभामासंवादे पंचमोध्यायः ॥ ॥छ॥५॥ पृथुरुवाच ॥ महत्फलं त्वया ६

प्रोक्तं यथा कार्तिकमाघयोः ॥ तयोः स्नानविधिं सम्यक् नियमानपि नारद ॥ १ ॥ उद्यापनविधिं चैव यथावद्वक्तुमर्हसि ॥ नारद उवाच ॥ हं विस्तारं शासंज्ञातोनाज्ञानं विधतेतव ॥ २ ॥ तथापि वदतः सम्यक् महात्म्यं शृणु वैन्यज ॥
आश्विनस्य तु मासस्य पाशुक्ले कादशीं भवेत् ॥ ३ ॥ कार्तिकव्रतदानानि तस्यां कुर्यादतंद्रितः ॥ सत्यान्तु र्यो राशेषा
यांमुद तिष्ठेत्सदाव्रती ॥ ४ ॥ नैऋत्यां शां व्रजेन्नात्वा माद्य हि सोदकभाजनः ॥ दिवा संध्यासु कर्णस्थब्रह्मसूत्रउदङ्मु
खः ॥ ५ ॥ वक्त्रं नियम्य यत्नेन छीवनश्वासवर्जितः ॥ कुर्यान्मूत्रपुरीषे च रात्रौ चेद्दक्षिणामुखः ॥ ६ ॥ गृहीत्वा शिश्न
माय गृहीत्वाशुचिमृत्तिकाः ॥ गंधलेपक्षयकरं शौचं कुर्यादतंद्रितः ॥ ७ ॥ एका लिंगे गुदे पंच त्रिर्वामदश चोभयोः ॥
द्विस सपादयोः पंच गृहीणां शौचमुच्यते ॥ ८ ॥ एतद्द्विगुणं ज्ञेयं ब्रह्मचारि वनस्थयोः ॥ यतेश्चतुर्गुणं शास्त्रोतदर्धं
शौचमाचरेत् ॥ ९ ॥ तदर्धं रजनीमार्गस्थः स्त्रीशूद्राणां तदर्धकं ॥ शौचकर्मविहीनस्य समस्ता निष्फलाः क्रि
याः ॥ १० ॥ मुखशुद्धिविहीनस्य न मंत्राः फलदाः स्मृताः ॥ दंतजिह्वा विशुद्धिं च ततः कुर्यात्प्रयत्नतः ॥ ११ ॥ आ
युर्बलं यशो वर्चः प्रजाः पशुवसूनि च ॥ ब्रह्मप्रज्ञां च मेधां च त्वं नो देहि वनस्पते ॥ १२ ॥ इति मंत्रं समुच्चार्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ह्वादन्तांगुलिभिर्गृहीं॥ सभिधांक्षीरवृक्षस्यक्षयाहोपोषणैर्विना॥१४॥प्रतिपद्दर्शनवमीषष्ठीर्कदिनेतथा॥
चंद्रसूर्योपरागेचनकुर्याद्दंतधावनं॥१५॥ कटकीस्वक्षकार्पासीनिर्गुंडीब्रह्मवृक्षकान्॥ वटैरंडविगंधाश्चा
न्वर्जयेद्दंतधावने॥१६॥ततोविष्णोःशिवस्यापिगृहंगत्वाछसंनधीः॥गंधपुष्पसतांबूलान्गृहीत्वाभक्ति
लसरः॥१७॥तत्रदेवस्यपाद्यादीनुपचारान्पृथक्पृथक्॥दत्वास्तुत्वापुनर्नत्वाकुर्यान्नीतादिमंगलान्॥
॥१८॥तालवेणुमृदंगादिध्वनियुक्तान्सनर्तकान्॥तत्रागत्वाद्विजानूभक्त्यासंपूज्यविधिवत्सदा॥१९॥भ
सुरानर्चितान्दृष्ट्वाविष्णुस्तुष्यतिसर्वदा॥पुष्पैर्गंधैःसतांबूलैर्गायकानर्चयेत्॥२०॥देवालयेगान
परायतस्तेविष्णुमूर्तयः॥तपांसियज्ञदानानिदरतानिचजन्महुरेः॥२१॥तुष्टिदानिकलौयस्मात्तस्मा
त्तानंप्रशस्यते॥गायनेनर्चनैर्देवाःसर्वेतुष्यंतिभक्तितः॥२२॥कलौवसामिदेवेशामयापघस्तुपार्थिवा॥
विष्णुरेवतदाप्रीहमद्भक्तिपरितोषतिः॥२३॥नाहंवसामिवैकुंठेयोगिनांहृदयेरवौ॥मद्भक्तायत्रगायंती
तत्रतिष्ठामिनारद॥२४॥तेषांगंधादिभिःपूजाक्रियतेनरैः॥तेनप्रीतिपरांयामिनतथामत्प्रपू

मोगरा काटेसावर कर्णाहिंदुस्थानेप्रसिद्धा आसंद जुयि

अपामार्ग जनात्॥२५॥मसुराणांकथांश्रोतुंमद्भक्तानांचगायनं॥नगछंतिनराम्रूढास्तेमद्वेष्याभवंतिहि॥२६॥शिरीषो
धोतरा न्मत्तगिरिजैमल्लिकाबिल्वमत्तीपचैः॥अर्कजैःकर्णिकारैश्चविष्णुर्नार्चेस्तथाक्षतैः॥२७॥जपाकुंदशिरीषैश्चयूथिका
मधुमाल मालतीभवैः॥केतकीभवपुष्पैश्चनैवार्च्यःशंकरस्तथा॥२८॥गणेशंतुलसीपत्रैर्दुर्गांनैवचदूर्वया॥मुनिपुष्पै हेटि
ती स्तथासूर्यंलक्ष्मींकामोनचार्चयेत्॥२९॥एभ्योन्यानिप्रशस्तानिपूजायांसर्वदैवतु॥एवंपूजाविधिंकृत्वा दूरे
देवदेवंक्षमापयेत्॥३०॥मंत्रहीनंक्रियाहीनंभक्तिहीनंसुरेश्वर॥यत्पूजितंमयादेवपरिपूर्णंतदस्तुमे॥
॥३१॥ततःप्रदक्षिणांकृत्वादंडवत्प्रणिपत्यच॥ततःक्षमापयेद्देवंगायनाद्यंसमाप्यच॥३२॥विष्णोःशिव
स्यापिचपूजनंयेकुर्वंतिसम्यक्निशिकार्तिकस्यच॥निधूतपापास्सहपूर्वजैस्तेप्रयांतिविष्णोर्भवनेसनु
ष्याः॥३३॥ ॥इतिश्रीपद्मपुराणेकार्तिकमाहात्म्येकृष्णसत्यभामासंवादेषष्ठोध्यायः॥६॥ ॥श्री॥ ॥श्री॥
॥श्री॥नारदउवाच॥नाडीद्वयावशिष्टायांरात्र्यांगच्छेज्जलान्प्रति॥तिलदर्भाक्षतापुष्पगंधाद्यैःसहितः
शुचिः॥१॥मानुषेदेवखातेवानद्यामथवसंगमे॥कृयाद्द्रागुणंस्नानंतीर्थेनंतफलंस्मृतं॥२॥विष्णुंस्मृ

३० त्वा ततः कुर्यात्संकल्पं सर्वं नक्ष्यतु ॥ तीर्थादिदेवताभ्यश्च क्रमादर्घ्याणि दापयेत् ॥ ३ ॥ नमः कमलनाभाय नमस्ते
जलशायिने ॥ नमस्तेस्तु हृषीकेश गृहाणार्घ्यं नमोस्तु ते ॥ ४ ॥ वैकुंठे च प्रयागे च तथा बदरिकाश्रमे ॥ यतो विष्णु
र्विचक्रमे त्रेधा निदधे पदं ॥ ५ ॥ अतो देवा अवंतु नो यतो विष्णुर्विचक्रमे ॥ तैरेव सहितैः सर्वैर्मुनिवेदमरुद्गणान्वितैः ॥
६ ॥ कार्तिकेहं करिष्यामि प्रातःस्नानं जनार्दन ॥ प्रीत्यर्थं तव देवेश दामोदरदयार्णव ॥ ७ ॥ नित्यनैमित्तिके कृ
त्स्न कार्तिके पापनाशने ॥ गृहाणार्घ्यं मया दत्तं दनुजेन्द्रनिषूदन ॥ ८ ॥ स्मरत्वा भागीरथीं विष्णुं शिवं सूर्यं जले
विशेत् ॥ नाभिमात्रे नतस्तिष्ठन् व्रती स्नायाद्यथाविधि ॥ ९ ॥ तिलामलकचूर्णेन गृही स्नानं समाचरेत् ॥ वि
विधवा धवा स्त्रीयतीनां च तुलसीमूलमृत्तया ॥ १० ॥ सप्तमीदर्शनवमीद्वितीयादशमीषु च ॥ त्रयोदश्यां च न स्ना
याद्धात्रीफलतिलैस्सदा ॥ ११ ॥ आदौ कुर्यान्मलस्नानं मंत्रस्नानं ततः परं ॥ स्त्रीशूद्राणां न वेदोक्तैर्मंत्रैस्तेषां पु
राणजैः ॥ १२ ॥ त्रिधाम्न देवकार्यार्थं यः पुरा भक्तभावन ॥ स विष्णुस्सर्वपापघ्नः पुनातु कृपयात्र मां ॥ १३ ॥ वि ३०
ष्णोराज्ञामनुप्राप्य कार्तिके व्रतकारिणं ॥ रक्षंति देवास्ते सर्वे मां पुनंतु सवासवा ॥ १४ ॥ वेदमंत्रास्सबीजास्स
रहस्या सबीजकाः ॥ कश्यपाद्याश्च मुनयो मां पुनंतु सदैव तु ॥ १५ ॥ गंगाद्यास्सरितस्सर्वास्तीर्थानि जलदा

नदाः ॥ ससप्तसागरास्सर्वे मां पुनंतु जलाशया ॥ १६ ॥ पतिव्रतास्त्वदित्याद्याय यक्षाः ॥ सिद्धास्सपन्नगाः ॥
ओषध्यः पर्वताश्चापि मां पुनंतु त्रिलोकजाः ॥ १७ ॥ एभिस्नात्वा व्रती मंत्रैर्हस्तन्यस्तपवित्रकः ॥ देवर्षिमान
वपितृंस्तर्पयेच्च यथाविधि ॥ १८ ॥ यावंतः कार्तिके मासि वर्तते पितृतर्पणे ॥ तिलास्तत्संख्यकाब्दानि पितरस्स्वर्ग
वासिनः ॥ १९ ॥ ततो जलाद्विनिःक्रम्य शुचिर्वस्त्रावृतो व्रती ॥ प्रातःकालोदितं कर्म समाप्यार्च्यो हरिस्ततः ॥ २० ॥
तीर्थानि देवान्संस्मृत्य पुनरर्घ्यं प्रदापयेत् ॥ गंधपुष्पफलैर्युक्तान्नूनमेत्या तत्सरमानसः ॥ २१ ॥ व्रतिनः कार्ति
के मासि स्नातस्य विधिवन्मया ॥ गृहाणार्घ्यं मया दत्तं सुधीयास्सहितो हरे ॥ २२ ॥ ततश्च ब्राह्मणान्नमस्या पूज
येद्वेदपारगान् ॥ गंधपुष्पैस्सतांबूलैः प्रणमेच्च पुनः पुनः ॥ २३ ॥ तीर्थादि दक्षिणे पादे वेदास्तन्मुखमाश्रिताः ॥
सर्वांगेष्वाश्रिता देवाः पूजितास्ते तदर्चया ॥ २४ ॥ अव्यक्तरूपिणो विष्णोः स्वरूपं ब्राह्मणा भुवि ॥ नावमा
न्या नो विरुध्याः कदाचिच्छुभमिच्छता ॥ २५ ॥ ततो हरिप्रियां देवीं तुलसीमर्चयेद्व्रती ॥ प्रदक्षिणानमस्का
रान्कुर्यादेकाग्रमानसः ॥ २६ ॥ देवैस्त्वं निर्मिता पूर्वमर्चितासि मुनीश्वरैः ॥ नमो नमस्ते तुलसी पापं हर हरिप्रि
ये ॥ २७ ॥ ततो विष्णुकथां श्रुत्वा पौराणीं स्थिरमानसः ॥ ब्राह्मणान्समुनीन्विप्रं पूजयेद्दक्षिमाव्रती ॥ २८ ॥ एवं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

६ नारिकेलादि
६ओं स्ति दुष्ट। रास्टदुष्ट · निंबुन जंबिर   ८ अल्पदुषित दमनं

एवं सर्वविधिं सम्यक् पूर्वोक्तं मन्त्रिमान् नरः॥ कुरोतियः स लभते नारायणसलोकतां॥२१॥ आरोग्यदं पातक
नाशकं सरं सद्बुद्धिदं पुत्रधनादि साधकं॥ मुक्तेर्निदानं नहि कार्त्तिकव्रतादि विष्णुप्रियादन्यदिहास्ति भूतले॥
२०॥ ॥ इति श्रीपद्मपुराणे कार्त्तिकमाहात्म्ये कृष्णसत्यभामासंवादे सप्तमोध्यायः॥७॥ नारद उवाच॥ कार्त्ति
कव्रतीनां पुंसां नियमा ये प्रकीर्तिताः॥ तान् अहं शृणु धर्मज्ञ जनः कथ्यमानान् समासतः॥१॥ सर्वामिषाणि माषांश्च
क्षौद्रं सौवीरकं तथा॥ राजिकामौदकं चापि नैवाद्यात्कार्त्तिकव्रती॥२॥ द्विदलं तिलतैलं च तथान्नं भाव दूषितं॥ भावदुष्टं न वदुष्टं वर्जयेत्कार्त्तिकव्रती॥३॥ परान्नं च परद्रोहं परदेशागमं तथा॥ तीर्थं विना सदैवेह
वर्जयेत्कार्त्तिकव्रती॥४॥ वेददेवद्विजानां च गुरूणां व्रतीनां तथा॥ स्त्रीराजमहतां निंदां वर्जयेत्कार्त्तिकव्रती॥
॥५॥ प्राण्यंगमामिषं चूर्णं फलं जंबीरमामिषं॥ धान्ये मसूरिका प्रोक्ता अन्नं पर्युषितं तथा॥६॥ गोछाग
महिषीभ्यः ताद् अन्यद् दुग्धादि चामिषं॥ द्विजक्रीता रसाः सर्वे लवणं भूमिजं तथा॥७॥ ताम्रपात्रस्थितं गव्यं
जलं पल्वले संस्थितं॥ आत्मार्थं पाचितं चान्नमामिषं तद्बुधैः स्मृतं॥८॥ ब्रह्मचर्यमधः सुप्तिं पत्रावल्यां
च भोजनं॥ चतुर्थकाले भुंजीत कुर्यादेवं सदा व्रती॥९॥ नरकस्य चतुर्दश्यां तैलाभ्यंगं तु कारयेत्॥ अ

७ गोवर्ज मामिषं क्षीरं चर्मण्युदकमामिषं॥१४

मोली कुंगा चमि
६ बिल्वफल निंबु ६ कोंदा   १ कमलीनी देह
भोकरर   पोकळा   कुनगा
चापा

न्यत्र कार्त्तिके स्नायी तैलाभ्यंगं विवर्जयेत्॥१०॥ पलांडुं लशुनं शृंगं छत्राकं गृंजनं तथा॥ नालिकामूलकं शिग्रुं च
वर्जयेत्कार्त्तिकव्रती॥११॥ अलाबुं चापि वृंताकं कूष्मांडं बृहतीफलं॥ श्लेष्मातकं कपित्थं च वर्जयेद्वैष्णवव्र
ती॥१२॥ रजस्वलांत्यजम्लेच्छपतितान्व्रतिके तथा॥ द्विजद्विड्वेदबाह्यैश्च न वदेत्कार्त्तिकव्रती॥१३॥
एभिर्दृष्टं च काकैश्च सूतकान्नं च यत्॥ द्विःपाचितं च दग्धान्नं नैवाद्याद्वैष्णवव्रती॥१४॥
तानि वर्जयेन्नित्यं व्रती सर्वव्रतेष्वपि॥ ह्रस्वादिचापि कुर्वीत स्वशक्त्या विष्णुष्टये॥१५॥ कुष्मांड बृह
तीतरुणीमूलकं तथा॥ श्रीफलं च कलिंगं च फलं धात्रीभवं तथा॥१६॥ नारिकेलमलाबुं च पटोलं बदरी
फलं॥ चर्मवंताकं जंबीरं आकं क्रमेणैव तथा॥१७॥ एतान्यन्यानि वर्ज्यानि क्रमात्प्रतिपदादिषु॥ धात्रीफ
लं रवौ रात्र्यां वर्जयेत्सर्वदा ॥१८॥ एभ्योन्यवर्जयेत्किंचिद्धि हित्वा प्रीतये नरः॥ तत्पुनर्ब्राह्मणे दत्वा भक्ष
येत्सर्वदैवते॥१९॥ एवमेव हि माघेपि कुर्यात्सन्नियमान्व्रती॥ हरिजागरणं तत्र प्रभोधोत्सवकारकः॥२०॥
यथोक्तकारिणं दृष्ट्वा कार्त्तिकव्रतिनं नरं॥ यमदूताः पलायंते गजाः सिंहार्दिता यथा॥२१॥ वरं विष्णुव्रतं
पोपिन   द्विदलानि निष्पावा पो १ गरा जमाबा बर्बट्याश्च च वल्लि॥ आढकतुरी
तूरसा द्विमसवे द्विदलानि सा ज्यानि

Left margin: काजिं ५ / ५ सों हद / मोहरि / मं धं वि / नी बुक / फिद्रव्यंउ / सी पिच / पत्रि गण्यं / कादीं १ दुधि / बिल्वफल / ४ द्वेळ
Right margin: उडिद / कदो रद्रू / ष्यं / ४ कीह्वंभप / १ मोहा कुकरदु / जोरली / पोकुस्थ / तबीज / पोपिन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३२ ध्येतन्न यज्ञदानयाजकाः॥ यज्ञकृत्स्ना पृथा स्वर्गं वैकुंठं कार्तिकव्रती॥२२॥ भुक्तिमुक्तिप्रदानि ह्ययनिक्षेत्रा
णि भूतले॥ वसंति तानि तद्देहे कार्तिकव्रतकारिणः॥२३॥ दुःस्वप्नं दुष्कृतं किंचित् अनेनाशु यजं तथा
कार्तिकव्रतिनं दृष्ट्वा विलयं याति तत्क्षणात्॥२४॥ कार्तिकव्रतिनः पुंसो विष्णुवाक्यप्रणोदिताः॥ र
क्षां कुर्वंति शक्राद्याः राजानं किंकरा यथा॥२५॥ विष्णुव्रतकरा नित्यं यत्र तिष्ठंति पूजिताः॥ ग्रहभूतपि
शाचाद्या नैव तिष्ठंति तत्र वै॥२६॥ कार्तिकव्रतजं पुण्यं यथोक्तं व्रतकारिणः॥ न समर्थो भवेद्वक्तुं ब्र
ह्मापि हि चतुर्मुखः॥२७॥ विष्णुप्रियं सकलकल्मषनाशनं च तत्पुत्रपौत्रधनधान्यविवृद्धिकारि॥ ऊर्ज
व्रतं सनियमं कुरुते मनुष्यः किं तस्य तीर्थपरिशीलनसेवया च॥२८॥ ॥छ॥ इति श्रीपद्मपुराणे कार्ति
कमाहात्म्ये कृष्णसत्यभामासंवादे अष्टमोध्यायः॥८॥छ॥ नारद उवाच॥ ऊर्जे तु ऊर्जव्रतीनः सम्यगुद्याप
नविधिं शृणु॥ तच्छृणुष्व मयाख्यातं सविधानं समासतः॥१॥ ऊर्जे शुक्लचतुर्दश्यां कुर्यादुद्यापनं व्रती॥ चै २
व्रतसंपूरणार्थाय विष्णुप्रीत्यर्थमेव च॥२॥ तुलस्या उपरिष्टात्तु कुर्यान्मंडपिकां शुभाम्॥ सतोरणां ३२

चतुर्द्वारां पुष्पचामरशोभितां॥३॥ द्वारेषु द्वारपालांश्च पूजयेन्नामतः पृथक्॥ पुण्यशीलं सुशीलं च ज
२ सि विजयमेव च॥४॥ तुलसीमूलदेशे च सर्वतोभद्रसंज्ञितं॥ चतुर्भिर्वर्णकैः सम्यक्कृत्वा भाद्यं समलंकृतम्॥
॥५॥ तस्योपरिष्टात्कलशं पंचरत्नसमन्वितं॥ महाफलेन संयुक्तं शुभं तत्राभिधाय च॥६॥ पूजयेत्तत्र दे
वेशं सौवर्णं गुर्वनुज्ञया॥ उपचारैः षोडशभिर्नानाभक्ष्यसमन्वितैः॥७॥ रात्रौ जागरणं कुर्याद्गीतवा
दित्रमंगलैः॥ गीतं कुर्वंति ये भक्त्या जागरे चक्रपाणिनः॥८॥ जन्मांतरशतोद्भूतैस्ते मुक्ताः पापसं
चयैः॥ नराणां जागरे विष्णोर्गीतं नृत्यं प्रकुर्वतां॥९॥ गोसहस्रं च ददतां समं फलमुदाहृतं॥ गीतनृत्या
दिकं कुर्वन्दर्शयन्कौतुकानि च॥१०॥ पुरतो वासुदेवस्य रात्रौ यो हरिजागरे॥ पठन्विष्णुचरित्रा
णि यो रंजयति वैष्णवान्॥११॥ मुखे न कुरुते वाद्यं स्वप्राणापांश्च दर्शयेत्॥ भावैरेतैर्नरो यस्तु
कुरुते हरिजागरं॥१२॥ दिने दिने तस्य पुण्यं तीर्थकोटिसमन्वितं॥ ततस्तु पौर्णमास्यां तु सपत्नीकं
तु द्विजोत्तमान्॥१३॥ त्रिंशन्मितां तथैकं वा स्वशक्त्या वा निमंत्रयेत्॥ घरान्दत्वा यतो विष्णुर्मत्स्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्पोभवन्नतः ॥१४॥ द्वादश्यां प्रतिबुद्धे सौ त्रयोदश्यां यतः सुरैः ॥ दृष्टोऽर्चितश्च तुर्दश्यां तस्मात्स्य
स्तिथिरिहे ॥१५॥ चतुर्दश्यां मुपवसेच्छांतः प्रयतमानसः ॥ पूजयेत्तत्र देवेशं शूलं चक्रगदाधरं ॥१६॥
॥१३॥ नतस्तु पौर्णिमास्यां वै सपत्नीके द्विजोत्तमैः ॥ स्वयं च पारणं कुर्याद्व्रतसंपूर्णहेतवे ॥१७॥ अस्यां दि
हुतं जप्तं तदक्षय्यफलं स्मृतं ॥ अतस्तान्भोजयेद्विप्रान्पायसाज्यादिना व्रती ॥१८॥ अतो देवाद्
ति द्वाभ्यां जुहुयात्तिलपायसं ॥ प्रीत्यर्थं तस्य देवस्य देवानां च पृथक् पृथक् ॥१९॥ दक्षिणां च यथाश
क्त्या प्रदद्यात्प्रणमेच्च तान् ॥ पुनर्देवान्समभ्यर्च्य देवान्स्कंलसंत्तथा ॥२०॥ ततो गां कपिलां तत्र पू
जयेद्विधिवद्व्रती ॥ गुरुं व्रतोपदेष्टारं वस्त्रालंकारणादिभिः ॥२१॥ सपत्नीकं समभ्यर्च्य तांश्च विप्रा
न्क्षमापयेत् ॥ युष्मत्प्रसादाद्देवेशः प्रसन्नोऽस्तु सदा मम ॥२२॥ व्रतादस्माच्च यत्पापं सप्तजन्मकृ १३
तं मया ॥ तत्सर्वं नाशमायातु स्थितं चैतास्तु संततिः ॥२३॥ मनोरथास्तु सफलाः संतु सर्वे तथाऽन्ते
या ॥ देहांते वैष्णवं स्थानं प्राप्नुयामतिदुर्लभं ॥२४॥ इति क्षमापयित्वा तान्विप्रान्प्रसाप च विसर्जयेत् ॥

तामर्च्यां गुरवे दद्याद्दक्षिणायुक्तां तदा व्रती ॥२५॥ कार्त्तिके वाऽथ तपसि विधिरेवंविधः स्मृतः ॥ एवं यः कुरुते
सम्यक् कार्त्तिकस्य व्रतं नरः ॥२६॥ विपाप्मा सर्वभोगाढ्यो विष्णुसांनिध्यगो भवेत् ॥ सर्वैर्व्रतैस्सर्वती
र्थैः सर्वदानैश्च यत्फलं ॥२७॥ तत्कोटिगुणितं ज्ञेयं सम्यगस्य विधानतः ॥ ते धन्यास्ते सदा पूज्यास्ते
षां च सफलो भवः ॥२८॥ विष्णुभक्तिरता ये स्युः कार्त्तिकव्रतचारिणः ॥ देहस्थितानि पापानि वितर्कै
यांति तद्भयात् ॥२९॥ दुर्धास्या भो भवत्येष कार्त्तिकव्रतकं नरः ॥ वर्षे वर्षे प्रकर्तव्यं कार्त्तिकव्रतकं नरैः ॥
॥३०॥ इत्यूर्जव्रतनियमान् श्रृणोति मध्यायो वै तत्कथपति च वैष्णवाग्रे ॥ तौ सम्यक्व्रतकरणफ
लं लभेद्यतः सर्वकलुषविनाशतं लभेत ॥३१॥ ॥ इति श्रीपद्मपुराणे कार्त्तिकमाहात्म्ये कृष्णसत्यभा
मासंवादे नवमोऽध्यायः ॥९॥ ॥ पृथुरुवाच ॥ यत्त्वया कथितं ब्रह्मन्व्रतमूर्ज्यस्य विस्तरात् ॥ तत्र
या तुलसीमूले विष्णोः पूजा त्वयोदिता ॥१॥ तेनाहं प्रष्टुमिच्छामि माहात्म्यं तुलसीभवं ॥ कथं सा तिप्रि
या तस्य देवदेवस्य शार्ङ्गिणः ॥२॥ कथमेषा समुत्पन्ना कस्मिन्स्थाने च नारद ॥ एतद्ब्रूहि समासेन स

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वैज्ञोसि मतो मम ॥ ३॥ नारद उवाच ॥ शृणु राजन्नवहितो माहात्म्यं तुलसीभवं ॥ सेतिहासं पुरावृत्तं त
त्सर्वं कथयामि ते ॥ ४॥ पुरा शक्रः शिवं द्रष्टुमगात्कैलासपर्वतं ॥ सर्वदेवैः परिवृतस्त्वप्सरोगणसेवितः ॥
॥ ५॥ यावद्गतः शिवगृहं तावत्तत्र स दृष्टवान् ॥ पुरुषं भीमकर्माणं दंष्ट्रानयनभीषणं ॥ ६॥ स दृष्ट्वा १४
स्तेन कस्त्वं भो क्व गतो जगदीश्वरः ॥ एवं पुनः पुनः पृष्टस्स यदा नोचिवान्पा ॥ ७॥ ततः क्रुद्धो वज्रपाणि
स्तं निर्भर्त्स्य वचोब्रवीत् ॥ शक्र उवाच ॥ रे मया पृष्टमानोपि नोत्तरं दत्तवानसि ॥ ८॥ अतस्त्वां हन्मि वज्रे न ५
६ दु ण कस्त्वां त्रातिस्त्रिभर्ते ॥ इत्युक्त्वा धृतवान्वज्री वज्रेणाभ्यहनद्दृढं ॥ ९॥ तेनास्य कंठो नीलत्वमगा
द्वज्रं च भस्मतां ॥ ततो रुद्रः प्रजज्वाल तेजसा प्रज्वलन्निव ॥ १०॥ दृष्ट्वा बृहस्पतिस्तूर्णं कृतां
जलिपुटोभ्यगात् ॥ इंद्रं च दंडवद्भूमौ कृत्वास्तोतुं प्रचक्रिरे ॥ ११॥ बृहस्पतिरुवाच ॥ नमो देवाधि
देवाय त्र्यंबकाय कपर्दिने ॥ त्रिपुरघ्नाय शर्वाय नमोंधकनिषूदन ॥ १२॥ विरूपायातिरूपाय बहुरू
पाय त्र्यंबके ॥ यज्ञविध्वंसकर्त्रे च यज्ञानां फलदायिने ॥ १३॥ कालांतकाय कालाय कालभोगि १४

धराय च ॥ नमो ब्रह्मशिरोहंत्रे ब्रह्मण्याय नमो नमः ॥ १४॥ नारद उवाच ॥ एवं संस्तुतस्तनः शंभुर्धिषले
न जगाद ह ॥ संहरेन्नयनज्वालां त्रिलोकीं दहनक्षमां ॥ १५॥ वरं वरय भो ब्रह्मन्प्रीतस्ते स्तवनात्तव ॥
शक्रस्य जीवदानेन जीवेति त्वं पृथां व्रज ॥ १६॥ बृहस्पतिरुवाच ॥ यदि तुष्टोसि देवेश पाहि त्वं हि शरणा
गतं ॥ अग्निरेव त्वामं यातु भालनेत्रसमुद्भवः ॥ १७॥ ईश्वर उवाच ॥ पुनः प्रवेशमायाति भाले नेत्रं कथं
त्रिशिखि ॥ एवं संक्ष्याम्यहं दूरे यथेंद्रं नोपपीडयेत् ॥ १८॥ नारद० ॥ इत्युक्त्वा तं करे धृत्वा प्राक्षिपल्लवणांभ
सि ॥ सोपतत्सिंधुगंगायोः सागरस्य च संगमे ॥ १९॥ तावत्स बालरूपत्वमगात्तत्र रुरोद च ॥ रुदतस्तस्य
शब्देन प्राकंपद्धरणी मुहुः ॥ २०॥ स्वर्गाद्ब्रह्मसत्यलोकांतास्तच्छब्देन बधिरीकृताः ॥ श्रुत्वा ब्रह्मा ययौ तत्र कि
मेतदिति विस्मितः ॥ २१॥ तावत्समुद्रस्योत्संगे तं बालं स ददर्श ह ॥ दृष्ट्वा ब्रह्माणमायांतं समुद्रो नृरूपतोंज
लिः ॥ २२॥ अगम्य त्विरसा बालं तस्योत्संगेन्यवेशयत् ॥ भो ब्रह्मन्सिंधुगंगायां जातोयं मम पुत्रकः ॥
॥ २३॥ जातकर्मादिसंस्कारान्कुरु धोस्य जगद्गुरो ॥ नारद उवाच ॥ इत्युक्तवति राजन्त्वे स बालः सा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथचमश्रु

१५ गरात्मजः॥२६॥ब्रह्माणमग्रहीत्कूर्चं च विधुन्वंस्तं मुहुर्मुहुः॥धुन्वतस्तस्य कूर्चं स्तु नेत्राभ्यामगमज्जलं॥२७॥
कथंचिन्मुक्तकूर्चस्तु ब्रह्मा प्रोवाच सागरं॥ब्रह्मोवाच॥नेत्राभ्यां विधुतं यस्मादेतेनैतज्जलं मम॥२८॥
तस्माज्जलंधर इति ख्यातो नाम्ना भविष्यति॥अधुनैष तरुणः सर्वशास्त्रार्थपारगः॥२९॥अवध्यः सर्व
भूतानां विना रुद्रं भविष्यति॥नारद उवाच॥इत्युक्त्वा शुक्रमाहूय राज्ये तं चाभ्यषेचयत्॥३०॥आमंत्र्य स
रितां नाथं ब्रह्मांतर्धानमागमत्॥अथ तद्दर्शनोत्फुल्लनयनः सागरस्तदा॥३१॥कालनेमिसुतां वृंदां त
द्भार्यार्थमयाचत॥ततः कालनेमिप्रमुखास्ततो सुरास्तस्मै सुतां तां प्रददुः प्रहर्षिताः॥सचापि तां प्राप्य
सुहृद्दारान्वश्रीश्लाघ्यासगां शुक्रसहायवान्बली॥३२॥ ॥इति श्रीपद्मपुराणे कार्त्तिकमाहात्म्ये कृष्णस
त्यभामासंवादे दशमोध्यायः॥१०॥ ॥नारद उवाच॥ये देवैर्निर्जिताः पूर्वं दैत्याः पातालसंस्थिताः॥
तेपि भूमंडलं यातानिर्भयास्तमुपाश्रिताः॥१॥कदाचिच्छिन्नशिरसं दृष्ट्वा राहुं स दैत्यराट्॥पप्रच्छ ना १६
र्भवं तस्य शिरसश्छेदकारणं॥२॥स तत्प्राह समुद्रस्य मथनं देवकारितं॥रत्नापहरणं चैव दैत्यानां

च पराभवं॥३॥स श्रुत्वा क्रोधरक्ताक्षः स्वपितुर्मथनं तदा॥दूतं संप्रेषयामास घस्मरं शक्रसन्निधौ॥४॥
दूतस्त्रिविष्टपं गत्वा सुधर्मां प्राविशत्त्वरात्॥गर्वादखर्वमौलिस्तु देवेंद्रं वाक्यमब्रवीत्॥५॥घस्मर उ
वाच॥जलंधरोब्धितनयः सर्वदैत्यजनेश्वरः॥दूतोहं प्रेषितस्तेन स यदाह शृणुष्व तत्॥६॥कस्मा
त्त्वयाममपिता मथितः सागरोद्रिणा॥नीतानि सर्वरत्नानि तानि शीघ्रं प्रयच्छ नः॥७॥नारद उवाच॥
इति दूतवचः श्रुत्वा विस्मितस्त्रिदशाधिपः॥उवाच घस्मरं क्रोधाद्भयविह्वललोचनः॥८॥इंद्र उवाच॥
शृणु दूत मया पूर्वं मथितः सागरो यथा॥अद्रयो मद्भयाच्चस्ताः स्वकुक्षिस्थाः कृतास्तथा॥९॥अन्येपि म
द्द्विषस्तेन रक्षिता दितिजाः पुरा॥तस्मात्तद्रत्नजातं च मयाप्यपहृतं किल॥१०॥इत्थं स्वोप्येवं पुरा देवानद्वि
षल्लामरात्मजः॥मम भ्रातुर्जनन्निहतः प्रविष्टस्सागरोदरं॥११॥तद्गच्छ कथय स्वास्य सर्वं मथनकारणं॥
नारद उवाच॥इत्थं विसर्जितो दूतस्तदिंद्रेणागमद्द्रुतं॥१२॥तदीदं वचनं सर्वं दैत्यायाकथयत्तदा॥तं नि
शम्य तदा दैत्यो रोषात्प्रस्फुरिताधरः॥१३॥उद्योगमकरोत्तूर्णं सर्वदेवजिगीषया॥ततो योगे सुरें

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्द्रश्चादिभ्यः पातालतस्तथा ॥१८॥ दितिजाः प्रतिपद्यंते कोटिशः कोटिशस्तदा ॥ अथ शुंभनिशुंभाद्यै
१६ र्दैत्याधिपतिभिस्तदा ॥१९॥ गत्वा त्रिविष्टपं दैत्यानंदनाधिष्ठितोन्नवत् ॥ निर्ययुस्त्वमरावत्यां देवा युद्धा
यदंशिताः ॥१६॥ पुरमावृत्य तिष्ठंतं दृष्ट्वा दैत्यबलं महत् ॥ ततो महदभूद्युद्धं देवदानवसेनयोः ॥१७॥ मु
सलैः परिघैर्बाणैर्गदाशक्तिपरश्वधैः ॥ तेन्योन्यं समाधावन् निजघ्नुश्च परस्परं ॥१८॥ तत्क्षणेनाभ
वत्सेना रुधिरौघप्रवर्षिणी ॥ पतितैः पात्यमानैश्च गजाश्वरथपत्तिभिः ॥१९॥ न्यराजत रणो भूमिः संध्या
भ्रपटलैरिव ॥ तत्र युद्धे मृतान् दैत्यान् भार्गवस्त्वमजीवयत् ॥२०॥ विद्यायाम्रतजीविन्या मंत्रितैस्तोयबिं
दुभिः ॥ देवानपि हतान् युद्धे तत्राजीवयदंगिराः ॥२१॥ दिव्योषधीः समानीय द्रोणाद्रेः स पुनः पुनः ॥ दृष्ट्वा
देवान्सतान्युद्धे पुनरेव समुत्थितान् ॥२२॥ जलंधरः क्रोधवशो भार्गवं वीक्ष्य चाब्रवीत् ॥ जलंधर उवाच ॥
मया युद्धे हता देवा उत्तिष्ठंति कथं पुनः ॥२३॥ त्वे वयंजीविनी विद्या नैवान्यत्रेति नः श्रुतं ॥ शुक्र उवाच ॥ दि १६
व्योषधीः समानीय द्रोणाद्रेरंगिराः सुरान् ॥२४॥ जीवयत्येष तं शीघ्रं द्रोणाद्रिं त्वमुपाहर ॥ नारद उवाच ॥

इत्युक्तस्तु दैत्यैः द्रोणीत्वाद्रोणाचलं तदा ॥२५॥ प्राक्षिपत्सागरे तूर्णं पुनरागान्महाहवं ॥ अथ देवा
न्हतान्दृष्ट्वा द्रोणाद्रिमगमद्गुरुः ॥२६॥ तावत्तत्र गिरीन्द्रं तं न ददर्श सुरार्चितः ॥ ज्ञात्वा दैत्यहृतं द्रोणं
धिषणो भयविह्वलः ॥२७॥ आगत्य दूराद्धाजश्चासाकुलितविग्रहः ॥ पलायध्वं महादेवा नायं जे
तुं क्षमो यतः ॥२८॥ रुद्रांशसंभवो ह्येष स्मरध्वं शक्रचेष्टितं ॥ नारद उवाच ॥ श्रुत्वा तद्वचनं देवा भयवि
ह्वलितास्तदा ॥ दैत्यैर्वध्यमानाश्च पलायंते दिशो दश ॥ देवान्विद्रावितान्दृष्ट्वा ततः सागरनंदनः ॥
॥३०॥ शंखभेरीजयरवैः प्रविवेशामरावतीं ॥ प्रविष्टे नगरीं तस्मिन् देवाः शक्रपुरोगमाः ॥३१॥ सुवर्णाद्रि
गुहां प्राप्ता न्यवसन् दैत्यतापिताः ॥ दुःखाभिभूतास्ते सर्वे विष्णुं शरणमन्वियुः ॥३२॥ ततः सर्वे वसु
रोधिधारेषिं द्रादिकानां विनिवेशायत्नदा ॥ शुंभादिकान् दैत्यवरान्पृथक् पृथक् स्वयं सुवर्णाद्रि
गुहामगात् बलः ॥३३॥ इति श्रीपद्मपुराणे कार्तिकमाहात्म्ये सत्यभामासंवादे जलंधरोपाख्या
ने एकादशोध्यायः ॥११॥ नारद उवाच ॥ पुरा देव्यं सभायां तं दृष्ट्वा देवाः सवासवाः ॥ अयप्रव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पिता: सर्वे विष्णुं स्तोतुं प्रचक्रमुः ॥ ११ ॥ श्री देवा ऊचुः ॥ नमो वस्तु कूर्मादि नानास्वरूपैः सदा भ ॥ क
कार्यो धनाय त्रिहिंत्रे ॥ विधात्रादिसर्गस्थितिध्वंसकर्त्रे गदाशंखपद्मादिहस्ताय तस्मै ॥ २ ॥ रमाव
ल्लभायासुराणां निहंत्रे भुजंगारियानाय पीतांबराय ॥ मखादिक्रियापाककर्त्रे विकर्त्रे शरण्याय
१८ तस्मै नतास्मि नतास्मो नतास्मः ॥ ३ ॥ नमो दैत्यसंतापितामर्त्यदुःखाचलध्वंसदंभोलये विष्णु
वे ते । भुजंगेशतल्पशायायार्कचंद्रद्विनेत्राय तस्मै नताश्मो नताश्मः ॥ ४ ॥ नारद उवाच ॥ संकष्टना १८
शनं नामस्तोत्रमेतत्पठेन्नरः ॥ स कदाचिन्न संकष्टैः पीड्यते कृपया हरेः ॥ ५ ॥ इति देवास्तुतिं या
कुर्वंति दनुजद्विषः ॥ तावत्सुराणामापत्ति विज्ञाना विष्णुना तदा ॥ ६ ॥ स हसोत्थाय देशारिः कृप
यारिविं नमानसः ॥ आरुह्य गरुडं वेगात्क्ष्मिवचनमब्रवीत् ॥ ७ ॥ श्री भगवानुवाच ॥ अलं धरे
णाते भ्रातर्देवानां केहनं छलं ॥ नैरा दुर्लोगम्मिथ्या भियुद्धायाथ त्वरान्वितः ॥ ८ ॥ श्रीरुवाच ॥ अहं ते
वल्लभा नाथ भक्त्याश्च यदि वल्लभा ॥ तत्कथं ते मम भ्राता युद्धे वध्यः कृपानिधे ॥ ९ ॥ श्री भगवानुवाच ।

रुद्रांशसंभवत्वाच्च ब्रह्मलोवचनादपि ॥ प्रित्याच्चतवैनैवायं मम वध्यो जलंधरः ॥ १० ॥ नारद उवाच ॥
इत्युक्त्वा गरुडारूढः शंखचक्रगदासिभृत् ॥ विष्णुर्वेगाद्ययौ योद्धुं यत्र देवाः स्थितास्तदा ॥ ११ ॥ अथा
रुणानुजप्रवाताक्षवालप्रपीडिताः ॥ वातविविवर्तिता दैत्या बभ्रमुः स्वे यथा घनाः ॥ १२ ॥ ततो जलं
धरो दृष्ट्वा दैत्यान्वातप्रपीडितान् ॥ रुष्टस्यनयनेकोधा ववृत्तो विष्णुं समभ्ययात् ॥ १३ ॥ ततश्च समा
भवद्युद्धं विष्णुदैत्येंद्रयोर्महत् ॥ आकाशंकुर्वतो बाणैः सहसा निरवकाशवत् ॥ १४ ॥ विष्णुर्दैत्यस्य बाणौघै
र्ध्वजं छत्रं धनुर्हयान् ॥ चिच्छेद तं च हृदये बाणेनैकेन ताडयत् ॥ १५ ॥ ततो दैत्यः समुत्पत्य गदापाणिस्त्व
रान्वितः ॥ आहत्य गरुडं मूर्ध्नि पातयामास भूतले ॥ १६ ॥ विष्णुर्गदां स खड्गेन चिच्छेद प्रहसन्निवाला
वस्य हृदये विष्णुं जघान दृढमुष्टिना ॥ १७ ॥ ततस्तौ बाहुयुद्धेन युयुधाते महाबलौ ॥ बाहुभिर्मुष्टि
भिश्चैव जानुभिर्नादयन्महीम् ॥ १८ ॥ एवं तौ सुचिरं युद्धं कृत्वा विष्णुः प्रतापवान् ॥ उवाच दैत्यराजा
नं मेघगंभीरनिस्वनः ॥ १९ ॥ श्री रघुरुवाच ॥ वरं वरय दैत्येंद्र प्रीतोस्मि तव विक्रमात् ॥ अरे यम पिते

दप्रियसेमनसिवर्त्तते॥२०॥जलंधर उवाच॥यदिभावुकतुष्टोसि चरमेनेददस्वमे॥मत्स्थित्यास
हलयामहहेसगणोसदा॥२१॥नारद उवाच॥तथेत्युक्त्वासभगवान्सर्वदेवगणैःसह॥जलंधर
नामपुरंत्वागमद्रमयासह॥२२॥जलंधरस्ततोदेवानामधिकारेषुदानवान्॥स्थापयित्वासहर्षःसन्
॥१९॥ पुनरागान्महीतलम्॥२३॥देवगंधर्वसिद्धेषुयत्किंचिद्रत्नसंज्ञितं॥तदात्मवशगंहत्वातिष्ठत्सा
गरनंदनः॥पातालभुवनेदैत्यंनिशुंभंसमहाबलं॥२४॥देवगंधर्वसिद्धाद्यान्यक्षराक्षसमा ॥१९॥
नुषान्॥स्वपुरेनागरान्कृत्वाशशाससभुवनत्रयं॥२५॥एवंजलंधरःकृत्वादेवान्स्ववशवर्तिनः॥
धर्मेणपालयामासप्रजाःपुत्रानिवौरसान्॥२६॥नकश्चिद्व्याधितोनैवदुःखितोनकृशस्तदा॥
नदीनोदृश्यतेतस्मिन्धर्मराज्यंप्रशासति॥नारदउवाच॥२७॥एवंमहींप्रशासतितस्मिन्वैन्द्रधर्मेण
सम्यक्समयदृष्ट्याहं॥कदाचिदगादथतस्यलक्ष्मींविलोकितुंश्रीरमणंचसेवितुं॥२८॥ ॥१९॥
॥छ॥इतिश्रीपद्मपुराणेकार्तिकमाहात्म्ये[illegible]सभामासंवादेजलंधरोपाख्यानेद्वादशोध्यायः॥१२॥

नारदउवाच॥समौसंपूज्यविधिवद्दानवेंद्रोतिथिंक्षिमान्॥मत्स्पृहस्यतदावाक्यंजगादनृपसत्त
म॥१॥कुतआगम्यतेब्रह्मन्किंचिद्दृष्टंत्वयाक्वचित्॥यदर्थमिहचायातस्तदाज्ञापयमां
मुने॥२॥नारदउवाच॥ततःकैलासशिखरंदैत्येंद्राहंयदृच्छया॥तत्रोमयासहासीनं
दृष्टवानस्मिशंकरं॥३॥योजनायुतविस्तीर्णेचिंतामणिसुदीपिते॥कामधेनुशताकी
र्णेकल्पवृक्षमहावने॥४॥तंदृष्ट्वामहदाश्चर्यंवितर्कोमेभवत्तदा॥क्वापीदृशीभवेदृ
द्धिस्त्रिलोक्यांवानवेतिच॥५॥तावत्तवापिदैत्येंद्रसमृद्धिंसंस्मरामया॥त्रिलोक
नकामोहंत्वत्सान्निध्यमिहागतः॥६॥त्वत्समृद्धिमिमांपश्यन्स्त्रीरत्नरहितांध्रुवं॥
तर्कयामिसमृद्धोवादन्यत्त्रिलोक्यांनसमृद्धिभाक्॥७॥अप्सरोनागकन्याद्यायद्यपितवगृ
हेस्थिताः॥तथापितासांनैवस्याद्रूपेणसदृशीध्रुवं॥८॥यस्यालावण्यजलेचोनि
मग्नश्चतुराननः॥स्ववीर्यममुचत्सर्वतयाकन्योपमीयते॥१०॥वीतरागोपिहियया

१९

मदनारिः स्वलीलया ॥ सौंदर्यगहने भ्राम्यच्छबरीरूपया पुरा ॥१०॥ निष्कामः कामशत्रोपि
स्ववशो विवशः कृतः ॥ तस्याः पुनः पुनः पश्यन्रूपं धाता विसर्जने ॥११॥ समभोपारसव्यासां
यत्नमेकापि नाभवत् ॥ अतः स्त्रीरत्नसंभोक्तुः सम्पद्भिस्तस्य सा वरा ॥१२॥ तथा लवनदेशे
द्रसर्वरत्नाधिपस्य च ॥ एवमुक्त्वा तमामंत्र्य गते मय्यसदेशराट् ॥१३॥ तद्रूपश्रवणादासी
दनंगशरपीडितः ॥ अथ संप्रेषयामास सद्भूतं सिंहिकासुतं ॥१४॥ त्र्यंबकोयतदा किंचि
द्विष्णुमायाविमोहितः ॥ कैलासमगमद्राहुः कुर्वन्भ्रुकुंकुवर्चसं ॥१५॥ कार्छेन केछ
पर्छेदुवर्चसं स्वांगजेनतं ॥ निवेदितस्तदीशाय नंदीना प्रविवेशसः ॥१६॥ त्र्यंबकं
लतया प्रेरितो वाक्यमब्रवीत ॥ राहुरुवाच ॥ देव पंनगसेव्यस्य त्रैलोक्याधिपतेस्त
व ॥१७॥ सर्वरत्नेश्वरस्य त्वमाज्ञां शृणु वृषध्वजे ॥ स्मशानवासिनोनित्यं भस्मभा
रवहस्य च ॥१८॥ इमं वरस्य ते भार्या कथं हेमवती शुभा ॥ अस्तु रत्नाधिनाथो

१९

स्मिसा च स्त्रीरत्नसंज्ञिता ॥१९॥ तस्मान्ममैव सा योग्या नैव भिक्षाशिनस्तव ॥ नारद उवाच ॥
वदत्येवं तदा राहौ भ्रूमध्याच्छूलपाणिनः ॥ अभवत्पुरुषो रौद्रः स्त्रीव्रज्रनिःस्वनः ॥ सिंह
स्यः प्रेलल्जिह्वः सज्वालनयनो महान् ॥२१॥ ऊर्ध्वकेशः शुष्कतनुर्नरसिंह इवापरः ॥ स
तं खादितुमायांतं दृष्ट्वा राहुर्भयातुरः ॥२२॥ अधावदत्तवेगेन बाहुभ्यां सद्वारतं ॥ खा
खादितुमारब्धस्तावद्रुद्रेण वारितः ॥२३॥ नैवासौ वध्यतामेति दूतोयं परवान्यतः ॥ मुंचे
ति पुरुषः श्रुत्वा राहुं तत्याज सोंबरे ॥२४॥ राहुं त्यक्त्वा स पुरुषस्तत्कारदं व्यजिज्ञपत् ॥ पु
रुष उवाच ॥ क्षुधा मां बाधते स्वामिन्नस्तु त्वामभयोस्मि सर्वदा ॥२५॥ किं भक्षयेहं देव
ज्ञात्वा तदाज्ञापय मां विभो ॥ ईश्वर उवाच ॥ भक्षय स्वात्मनः शीघ्रं मांसं त्वं हस्तपादयोः ॥
॥२६॥ नारद उवाच ॥ सशिवेनैव चाज्ञप्तस्त्वखादत्पुरुषः स्वकं ॥ हस्तपादोद्भवं मांसं शिर
शेषो यथाभवत् ॥२७॥ दृष्ट्वा शिरोवशेषं तं सुप्रसन्नः सदाशिवः ॥ उवाच भीकर्मा
णं पुरुषं जातविस्मयः ॥२८॥ ईश्वर उवाच ॥ त्वं कीर्तिमुखसंज्ञो हि भव मच्चारगः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२० सदा॥ त्वदर्चां ये न कुर्वंती नैव ते मम प्रियं करा॥२७॥ नारद उवाच॥ तं दृष्ट्वा प्रणमंति देवस्य द्वारे स्थितिमु
खस्थितः॥ नार्चयंति हि ये पूर्वं तेषां पूजा वृथा भवेत्॥२८॥ राहुर्विमुक्तो यस्तेन सोपतद्बर्बरस्थले॥
अतः स बर्बरोद्भूतः भ्रमितिभ्रमो प्रथां गतः॥२९॥ ततस्तकरा हुः पुनरेव जातमात्मा नमस्मिन्निति म
न्यमानः॥ समेत्य सर्वं कथयां बभूव जलंधरायेव विचेष्टितं ततः॥३०॥ इति श्रीपद्मपुराणे कार्ति
स्य५ कमाहात्म्ये कृष्णा मासं वादे त्रयोदशोध्यायः॥१३॥ ॥श्री नारद उवाच॥ जलंधरस्तु तच्छ्रुत्वा
कोपाकुलितविग्रहः॥ निर्जगामाशु दैत्यानां कोटिभिः परिवारितः॥१॥ गच्छतस्यागततस्तस्य राहुर्दवि
स्थितोऽभवत्॥ मुकुटश्चापतन्भूमौ वेगात्रस्खलितस्तदा॥२॥ दैत्यसेन्याबलस्तत्र विमानानां रातेस्त
था॥ व्यराजत नभः पूर्णं प्रावृषीव यथा घनैः॥३॥ तस्योद्योगं तदोदृष्ट्वा देवाः शक्रपुरोगमाः॥ अलक्षितास्त
राजग्मुः शूलिनं ते व्यजिज्ञपुः॥४॥ देवा ऊचुः॥ न जानासि कथं स्वामिन्देवारिपरिचेष्टितं॥ तदस्माद्रक्ष
णार्थाय जलिसागरनंदनं॥५॥ नारद उवाच॥ इति देववचः श्रुत्वा प्रहस्य वृषभध्वजः॥ महाविष्णुं समा २०

हूय वचनं चेमब्रवीत्॥६॥ ईश्वर उवाच॥ जलंधरः कथं विष्णो न हतः संगरे त्वया॥ तद्गृहं चापि यातोसि
सक्त्वा वैकुंठमात्मनः॥७॥ विष्णुरुवाच॥ तवांशसंभवत्वाच्च भ्रातृत्वाच्च तथा श्रियः॥ न मया निहतस्संख्ये च मे
नं जहि दानवम्॥ श्रीमहादेव उवाच॥ नायमेभिर्महातेजाः शस्त्रास्त्रैर्वध्यते मया॥ दैवैः सह स्वतेजांसि च
स्त्रार्थं दातुमर्हथ॥१०॥ नारद उवाच॥ अथ विष्णुमुखा देवाः स्वतेजांसि ददुस्तदा॥ तानोत्म्यप्राप्य तानि च
द धासंचामुचन्महः॥११॥ तेनाकरोन्महादेवः सहसास्त्रं सुसत्तमं॥ चक्रं सुदर्शनं नाम तेजोज्वालातिभी
षणं॥१२॥ तेजः शोषणतुलथा वज्रे च रूलवान्हरः॥ तावज्जलंधरो दृष्टः कैलासतलभूमिषु॥१३॥ हस्त्यश्व
रथपत्तीनां कोटिभिः परिवारितः॥ तं दृष्ट्वालक्षिता जग्मुर्देवाः सर्वे यथागतं॥१४॥ गणाश्च समनह्यंत युद्धाय
तिवरान्विताः॥ नंदीभमुखसेनानीमुखाः सर्वे शिवाज्ञया॥१५॥ अवतेरूर्णावेगा कैलासाद्युद्धदुर्मदाः॥ त
तः समभवद्युद्धं कैलाससकाशमुवि॥१६॥ प्रथमं भेषपदैत्यानां घोरं शस्त्रास्त्रसंकुलं॥ भेरीमृदंगशंखो
घनिः स्वनैर्वीरहर्षणैः॥१७॥ गजाश्वरथशब्दैश्च मोदेभूत सिर्व्येकंपत॥ शक्तितोमरबाणौघमुसलैः प्राश
वर्द्विशैः॥१८॥ व्यजेरीतनमः प्रधिमुस्कामि रिवसंहतं॥ निहतैरथनागाश्च भूसि भूमिर्व्यराजत॥१९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वज्रहस्तावलग्नोरः कलशेरिव संहृतं ॥ प्रमथाहतदेहोघैर्याहतगणैस्तथा ॥ १९ ॥ वसा
रक्तांसमयं कोप्याभरगभ्याभिवर्त्तदा ॥ प्रमथाहतदेहोत्थान् भोगैवसत्त्वमजीवनं ॥ २० ॥ शुक्रे
पुनः पुनस्तत्रामृतसंजीवनीबलात् ॥ गतं दृष्ट्वा व्याकुलीभूतागणाः सर्वे भयान्विताः ॥ २१ ॥
शुक्रं स्तुर्देवदेवाय तत्सर्वं शुक्रचेष्टितं ॥ अथ रुद्रमुखात्कृत्या बभूवातीव भीषणा ॥ २२ ॥ ताल
जंघोदरीवक्त्रास्तनपीडितभूरुहा ॥ सा युद्धभूमिमासाद्य भक्षयंती महासुरान् ॥ २३ ॥
भार्गवं स्वभगे धृत्वा जगामांतर्हितानघः ॥ विगलत्भार्गवं दृष्ट्वा दैत्यसेनागणास्तदा ॥ २४ ॥
प्रम्लानवदनाः सर्वाश्चित्वजयुयुधुर्मुदा ॥ अथाभज्यत दैत्यानां सेनागणभयार्दिता ॥ २५ ॥ वायु
वेगहताश्वत्थवृक्षकीर्णितृणसंततिः ॥ भग्नां गणभयात्सेनां दृष्ट्वामर्षयुता ययुः ॥ २६ ॥ नि
शुंभशुंभसेनान्यो कालनेमिश्च वीर्यवान् ॥ जयस्तेवारयामासुर्गणसेनां महाबलाः ॥ २७ ॥
मुचलः सुरवर्षाणि प्रावृषीव बलाहकाः ॥ ततो दैत्यास्त्रोघास्ते शूला नाभिवव्रजाः ॥ २८ ॥
लरुकुंडः स्वदिक्षुः सर्वां गणसेनाश्चकंपयत् ॥ गणैः शरशूलैर्निघ्नो रुधिरासारवर्षिणः ॥
॥ २९ ॥

वसंते किंशुकाभास्तान प्रज्ञायंत किंचन ॥ पतिताः पात्यमानाश्च छिन्ना भिन्नास्तथा गणाः ॥ ३० ॥
स्वल्कोसंग्रामभूमिं ते सर्वे पिविमुखा भवन् ॥ ततः प्रभग्नं स्वबलं विलोक्य शैलादलंबोदरकार्त्ति
केयाः ॥ वरान्विता दैत्यवरान् प्रसह्य निवारयामासुरमर्षणास्ते ॥ ३१ ॥ ॥ इति श्रीपद्मपुराणे का
र्त्तिकमाहात्म्ये वृद्धसत्यभामासंवादे जलंधरोपाख्याने चतुर्दशोध्यायः ॥ १४ ॥ नारद उवाच ॥
ततो गणपतीन्दृष्ट्वा नंदीषण्मुखषण्मुखान् ॥ अमर्षाद्दैत्यधावंतद्वंद्वयुद्धाय दानवाः ॥ १ ॥
नंदिनं कालनेमिश्च शुंभोलंबोदरं तथा ॥ निशुंभः षण्मुखं वेगाद्दैत्यधावंतदंशिताः ॥
॥ २ ॥ निशुंभः कार्त्तिकेयस्य मयूरं पंचभिः शरैः ॥ हृदि विव्याधवेगेन मूर्छितः स
पपात ह ॥ ३ ॥ ततः शक्तिधरः शक्तिं याव जग्राह सोषितः ॥ तावं निशुंभो वेगेन हत्यास्ता
तमपातयत् ॥ ४ ॥ ततो नंदीश्वरो बाणैः कालनेमिमविध्यत ॥ कालनेमीस्तु सर्वाश्चाप
मुश्चिच्छेद नंदिनः ॥ ५ ॥ तदपास्य सच्छूलेन तं वक्षस्याहनद्दृढं ॥ स शूलेन विभिन्नहृदयो

२२

हताश्वो हतसारथिः ॥६॥ आजघ्ने मुद्गरमामुच्य शैलादे सोपपातयेत् ॥७॥ अथ षण्मु
खो गणेश्वरं हृदि विव्याध पत्रिणा ॥ सारथिं च त्रिभिर्विध्य पातयामास भूतले ॥८॥ ततोति
वेगः षण्मुखोपि बाणषट्केन गणाधिपं ॥ मूषकं च त्रिभिर्विध्य ननाद जलदस्वनः ॥९॥ मू
षकः शरभिन्नांगश्चचाल दृढवेदनः ॥ लंबोदरश्च पतितः पदातिरभवन्नृप ॥१०॥ ततो
लंबोदरः षण्मुखं हत्वा परशुना हृदि ॥ अपातयत्क्षणान्मौ मूषकं चाहनत्पुनः ॥११॥ कालने
मीनिशुंभौ श्राप्य भौलं लंबोदरं शूलैः ॥ युगपज्जघ्नतुः क्रोधात्तोयेशिव महाद्विपं ॥१२॥ तं पी
ड्यमानमालोक्य वीरभद्रो महाबलः ॥ अभ्यधावत वेगेन भूतकोटियुतस्तदा ॥१३॥ कू
ष्मांडभैरवाश्चापि वेतालायोगिनीगणाः ॥ पिशाचाश्च तथा नाथा लांगणाश्चापि तमचे
युः ॥१४॥ ततः किलकिलाशब्दैः सिंहनादैः सघर्घरैः ॥ नादितं डमरुकैश्चापि पृथिवीमास
मकंपत ॥१५॥ ततो भूताश्च धावंतं भक्षयंति स्म दानवान् ॥ उत्पतंति पतंति स्म नर

२२

तुश्चरणं गणे ॥१६॥ नंदी च कार्तिकेयश्च समाश्वस्तौ हरान्वितौ ॥ मिलित्वा तत्र रणे देवसान्नि
रं तरङ्गारवृंदैः ॥१७॥ छिन्नभिन्नाहतैर्दैत्यैः पतितैः रुधिरोक्षितैः ॥ व्याकुला साभवत्सेना
विषण्णवदना भवत् ॥१८॥ अविध्वस्तां तदा सेनां दृष्ट्वा सागरनंदनः ॥ रथेनातिपतोऽके
न भणान्नभियये बली ॥१९॥ हस्त्यश्वरथसंघातैः शंखभेरीरवैस्तथा ॥ अभ्ययात्सिंहनाद
श्च सेनयोरुभयोस्तदा ॥२०॥ जलंधरः शूरश्रोतेनद्धहारपटलैरिव ॥ धारावाप इव व्योम
छिन्नमंतरं समपद्यत ॥२१॥ गणेशः पंचभिर्विद्धः शैलादीन्वभिः शरैः ॥ वीरभद्रं च वि
शत्या निनाद जलदस्वनः ॥२२॥ कार्तिकेयस्तदा दैत्यं शक्त्या विव्याध सत्वरः ॥ स घूर्णोऽश
क्तिनिर्भिन्नः किंचिद्व्याकुलमानसः ॥२३॥ ततः क्रोधपरीतात्मा कार्तिकेयं जलंधरः ॥ ग
दया ताडयामास स च भूमितलेऽपतत् ॥२४॥ तथैव नंदिनं वेगात्पातयत्तत्तले ॥ तत
तो गणेश्वरः क्रुद्धो गदां परशुनाछिनत् ॥२५॥ वीरभद्रस्त्रिभिर्बाणैर्हृदि विव्याध दा.

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नवं॥ सप्तभिश्च हयान्केतुं धनुश्छत्रं च चिच्छिदे॥२६॥ ततोऽतिक्रुद्धो दैत्येशः प्रक्षिप्य मुद्गरं दारुणं॥
गणेशं पातयामास रथं चान्यमथारुहत्॥२७॥ अथान्यधावतवेगेन वीरभद्रं रुषान्वितः॥
२२ ततस्तौ समये संकाशौ युयुधाते परस्परं॥२८॥ वीरभद्रः पुनस्तस्य हयान्बाणैरपातयत्॥
धनुश्छित्त्वा दैत्यस्य पुप्लुवे परिघायुधः॥२९॥ नारद उवाच॥ स वीरभद्रश्चरयाभिगम्य
जघान दैत्यः परिघेन मूर्ध्नि॥ स चापि वीरः प्रविभिन्नमूर्धा पपात भूमौ रुधिरं समुद्गिरन्॥ २२
॥३०॥ इति श्रीपद्मपुराणे कार्तिकमहात्म्ये जलंधरोपाख्याने पंचदशोऽध्यायः॥ ॥ ॥
नारद उवाच॥ ॥ पतितं वीरभद्रं तु दृष्ट्वा रुद्रगणा भयात्॥ आगमंस्ते रणं हित्वा
क्रोशमाना महेश्वरं॥१॥ अथ कोलाहलं श्रुत्वा गणानां चन्द्रशेखरः॥ अभ्याययौ वृषारूढः
संग्रामं प्रहसन्निव॥२॥ रुद्रमायांतमालोक्यमायांतं लोक्य सिंहनादैर्गणाः पुनः॥ निवृ-
त्ताः संगरे दैत्यान्निजघ्नुः शरवृष्टिभिः॥३॥ दैत्याश्च भीषणं रुद्रं दृष्ट्वा सर्वे पिदुद्रुवुः॥
कार्तिकवृत्तिनं दृष्ट्वा पातकामिव तद्भयात्॥४॥ अथ जलंधरो दैत्यान्विद्रुताः प्रेक्ष्य सं-

गरे॥ रोषाद्धावच्चंडीशं मुंचन्बाणाः सहस्रशः॥५॥ शुंभो निशुंभप्रमुखाः कालनेमिर्बलाहकः॥ ख-
ड्गरोमा प्रचंडश्च घस्मराद्याः शिवं ययुः॥६॥ बाणांधकारसंछन्नं दृष्ट्वा गणबलं ह्युवः॥ ततो बाणजा-
लमाच्छिद्य स्वबाणैरावृणोन्नभः॥७॥ दैत्यांश्च बाणवात्याभिः पीडितान्रकोत्तमः॥ प्रचंडबाण-
जालौघैरपातयत भूतले॥८॥ खड्गरोमाणः शिरः कायात्तथा परशुनाच्छिनत्॥ बलाहकस्य
च शिरः खट्वांगेनाकरोद्द्विधा॥९॥ बध्वा च घस्मरं दैत्यं पाशेनाभ्यहनद्भुवि॥ वृषवेगहताः
केचित्केचिद्बाणैर्निपातिताः॥१०॥ न शेकुरसुरास्थातुं गजाः सिंहार्दिता यथा॥ ततः क्रोधप-
रीतात्मा वेगाद्रुद्रं जलंधरः॥११॥ आह्वयामास समरे तीव्राणि समस्वनः॥ जलंधर उवाच॥
युध्यस्वाद्य मया सार्धं किमेभिर्निहतैस्तव॥१२॥ यच्चापि किंचिद्बलं तेऽस्ति तद्दर्शय जलंधरे॥ नारद
उवाच॥ इत्युक्त्वा बाणसंततं याजंघानवृषभध्वजं॥१३॥ तान्प्राप्तानिषितैर्बाणैश्चिच्छेद प्रहस-
न्निवः॥ हत्वा तो हयान्ध्वजं छत्रं धनुश्चिच्छेद सप्तभिः॥१४॥ स छिन्नधन्वा विरथो वेगाद्गदामुद्यम्य स-
त्वरः॥ अभ्यधावच्छिवं तावल्लगदां बाणैर्द्विधाच्छिनत्॥१५॥ तथाप्युद्यम्य परिघं यो रुद्रं प्रति धा-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२८ सया॥तावच्छिवेन बाणौघैः क्रोशमात्रमपाकृतः॥२६॥ततो जलंधरो दैत्यो मत्वा रुद्रं बलाधिकं॥ २८
ससर्ज मायां गांधर्वीमद्भुतां रुद्रमोहिनीं॥२७॥ततो जगुश्च ननृतुर्गंधर्वाप्सरसां गणाः॥तालवे
णुमृदंगांश्च वादयंति स्म चापरे॥२८॥तद्दृष्ट्वा महदाश्चर्यं रुद्रो नादविमोहितः॥पतितान्यपि श
स्त्राणि करेभ्यो न विवेद सः॥२९॥एकाग्रीभूतमालोक्य रुद्रं दैत्यो जलंधरः॥कामार्तः स जगा
म शुभ्र यत्र गौरी स्थिताभवत्॥३०॥युद्धे शुंभनिशुंभाख्यौ स्थापयित्वा महाबलौ॥दशदोर्दंड
पंचास्यस्त्रिनेत्रश्च जटाधरः॥३१॥महावृषभमारूढः सवभ्रयजलंधरः॥अथ रुद्रं समायांत
मालोक्य भववल्लभा॥३२॥अभ्यायथौ सखीमध्यात्तद्दर्शनपथे भवत्॥यावद्ददर्श चार्वंगीं पा
र्वतीं दनुजेश्वरः॥३३॥तावत्स वीर्यं मुमुचे जडांगश्चाभवत्तदा॥अथ ज्ञात्वा तदा गौरी दानवं भ
यविह्वला॥३४॥जगामांतर्हिता वेगात्सा तदोत्तरमानसं॥तामदृष्ट्वा ततो दैत्यः क्षणाद्विद्युल्ल
तामिव॥३५॥जवेनागात्पुनर्युद्धं यत्र देवो वृषध्वजः॥पार्वत्यपि प्रियाघ्यं विष्णुं सस्मार मनसा तदा॥
॥३६॥तावद्ददर्श तं देवं प्रोवाच मधुरं तदा॥पार्वत्युवाच॥विष्णो जलंधरो दैत्यः कृतवान्परमा

द्भुतं॥३७॥तत्किं न विदितं तेऽस्ति चेष्टितं तस्य दुर्मतेः॥श्रीविष्णुरुवाच॥तेनैव दर्शितः पंथा वयमप्यनु
यामहे॥नान्यथा स भवेद्वध्यः पातिव्रत्यसुरक्षितः॥३८॥नारद उवाच॥जगाम विष्णुरित्युक्त्वा पुन
र्जालंधरं पुरं॥अथ रुद्रश्च गांधर्व्यां ज्ञातः संगरे स्थितः॥३९॥अंतर्धीनगतां मायां दृष्ट्वा संक्रुद्धवां
स्तथा॥ततः शर्वो विस्मितमानसः पुनर्जगाम युद्धाय जलंधरं तदा॥स चापि दैत्यः पुनरागतं शिवं
दृष्ट्वा शरौघैः समवाकिरद्रणे॥३१॥ ॥इति श्रीपद्मपुराणे कार्तिकमाहात्म्ये जलंधरोपाख्याने
षोडशोऽध्यायः॥१६॥ श्रीनारद उवाच॥विष्णुर्जालंधरं गत्वा तद्दैत्यपुटभेदनं॥पातिव्रतस्य
भंगाय वृंदायाश्चाकरोन्मतिं॥१॥अथ वृंदा तदा देवी स्वप्नमध्ये ददर्श ह॥भर्तारं महिषारूढं
तैलाभ्यक्तं दिगंबरं॥२॥कृष्णप्रसूनभूषाढ्यं क्रव्यादगणसेवितं॥दक्षिणाशागमं मुंडं त
मसा व्यावृतं तदा॥३॥स्वपुरं सागरे मग्नं सहसैवात्मना सह॥ततः प्रबुद्धा सा बाला तत्स्व
प्नं स्वं विचिन्वती॥४॥ददर्शोदितमादित्यं सच्छिद्रं निःप्रभं मुहुः॥तदनिष्टमिति ज्ञात्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दंतीमयविफला॥५॥कुत्रचिंनलनेछमेगोपुराट्टालमभिष्ठ॥ततःसखिद्वययुतानगरोद्यानमाग
मत्॥६॥तत्रसापिभ्रमद्धालानालनकुत्रचित्सुखं॥वनाद्वनांतरंयातानैववेदात्मनस्तदा॥७॥
सातत्रभ्रमतीबालाददर्शातीवभीषणं॥८॥राक्षसोसिंहवदनोदृष्ट्वादृष्टानमासुरो॥९॥तोदृष्ट्वा
तीवसाभीतापलायनपरातदा॥ददर्शतापसंशांतंसमाधिस्थंमौनमास्थितं॥९॥ततस्तत्कंठमा
२५ साद्यनिजांबाहुलतांभयात्॥मुनेमांरक्षशूरणमागमाभिसभाषत॥१०॥मुनिस्तांविह्वलांदृष्ट्वा २५
राक्षसानुगतांतदा॥हुंकारेणैवतंघोरंचकारविमुखंतदा॥११॥तद्धुंकारभयात्रस्तोदृष्ट्वातौ
विमुखोगतो॥प्रणम्यदंडवद्भूमौवृंदावचनमब्रवीत्॥१२॥वृंदोवाच॥रक्षिताहंत्वयाघोराद्
यादसात्कृपानिधे॥किंचित्त्वांप्रष्टुमिच्छामिकृपयातन्निशामय॥१३॥जलंधरोपिमद्भर्ताक
द्रंयोद्धुंगतःप्रभो॥सतत्रास्तेकथंयुद्धेतन्मेकथयसुव्रत॥१४॥नारदउवाच॥मुनिस्तद्वाक्यमा
कर्ण्यकृपयोर्ध्वमवैक्षत॥तावत्कपीसमायातौतंप्रणम्याग्रतस्थितौ॥१५॥ततस्तद्भ्रूल
तासंज्ञानियुक्तौगगनंप्रति॥गत्वाक्षणार्द्धादागम्यतंप्रणम्याग्रतस्थितौ॥१६॥शिरःक

बंधहस्तौतौदृष्ट्वासाविह्वलापत॥पपातमूर्छितामौभर्तुर्व्यसनदुःखिता॥१७॥कमंडलुदकैः
सिक्तामुनिनाश्वासितातदा॥स्वमस्तेभालेसाभालेवाद्वादीनारोदत॥१८॥वृंदोवाच॥स्वामिन्पुरा
सुखसंवादैर्विनोदयसिमांप्रभो॥सकथंनवदस्यद्यवेक्षंमामनागसं॥१९॥येनदेवाःसगंध
र्वानिर्जिताविष्णुनासह॥सकथंतापसेनात्रलोकैर्विजयीहतः॥२०॥नारदउवाच॥रुदस्ये
तितदावृंदातंमुनीवाक्यमब्रवीत्॥वृंदोवाच॥कृपानिधेमुनिश्रेष्ठजीवयैनंममप्रियं॥२१॥त्वे
मेवास्यपुनःशक्तोजीवनायमतोमम॥नारदउवाच॥इतितद्वाक्यमाकर्ण्यप्रहस्यमुनिर
ब्रवीत्॥२२॥मुनिरुवाच॥नायंजीवयितुंशक्तोमयारुद्रेणनिहतोमृधे॥तथापिकृपयाविष्ट
नंसंजीवयाम्यहं॥२३॥नारदउवाच॥इत्युक्त्वांतर्दधेविष्णुस्तत्रसागरनंदनः॥वृंदामालिंग्य
यद्वक्त्रंचुचुंबेप्रीतमानसः॥२४॥अथवृंदापिकांतंदृष्ट्वाहर्षितमानसा॥रेमेतद्वनमध्येचतेन
युक्तोबहुवारम्॥२५॥कदाचित्सुरतस्यांतेदृष्ट्वाविष्णुंतमेवहि॥निर्भर्त्स्यक्रोधसंयुक्ता
वृंदावचनमब्रवीत्॥२६॥वृंदोवाच॥धिक्तवैतद्धरेशीलंपरदाराभिगामिनः॥ज्ञातो
सित्वंमयासम्यक्मायाप्रच्छन्नतापसः॥२७॥यौत्वयामायया द्वास्थौस्वकपीदर्शितौ

मम॥ तावेव राक्षसौ मत्वा भार्यां तव नयिष्यतः॥ ४१॥ त्वं चापि भार्यादुःखार्त्तो वने कपिसहायवान्॥
मेव सर्वेभ्यो रणायं यस्त्वं ग्रीष्ये त्वमागतः॥ ४२॥ इत्युक्त्वा सा तदा वृंदा प्राविशज्ज्वलनं विष्णु
ना वार्यमाणापि तस्यामासक्तचेतसा॥ ४३॥ ततो हरिस्तां समनुस्मरन्मुहुर्वृंदाचिताभस्म
रजोवगुंठितः॥ तत्रैव तस्थौ सुरसिद्धसंघैः प्रबोध्यमानोपि ययौ न शांतिं॥ ४४॥ इति श्री
पद्मपुराणे कार्त्तिकमाहात्म्ये कृष्णसत्यभामासंवादे वृंदापातिव्रत्यभंगो नाम सप्तदशो
ध्यायः॥ १७॥ ॥ श्रीनारद उवाच॥ ततो जलंधरो दृष्ट्वा रुद्रमद्भुतविक्रमं॥ चकार माय
या गौरीं त्र्यंबकं मोहयन्निव॥ १॥ रथोपरि गतां बद्धां रुदंतीं पार्वतीं शिवः॥ निशुंभशुंभदैत्यैश्च तत्र
वध्यमानां ददर्श सः॥ २॥ अवाङ्मुखस्थितस्तूष्णीं विस्मृत्य स्वं पराक्रमं॥ ततो जलंधरो वेगात्
त्रिभिर्विव्याध सायकैः॥ ३॥ आपुंखमग्नैस्तै रुद्रः शिरस्युरसि चोदरे॥ ततो जज्ञे स तां मायां
स्वमायां प्रतिबोधतः॥ ४॥ रौद्ररूपधरो जातो ज्वालामालातिभीषणः॥ तस्यातीव महारौद्र
रूपं दृष्ट्वा महासुराः॥ ५॥ नेशुः शुंभप्रमुखाः स्थातुं नेशिरे ते दिगूर्ध्वदृशः॥ ततः शापं ददौ रुद्रस्तयोः शुं
भनिशुंभयोः॥ ६॥ मया युद्धादपयातौ वां गौर्या वध्यौ भविष्यथः॥ पुनर्जलंधरो वेगाद्ववर्ष निशि

तैः शरैः॥ ७॥ बाणांधकारसंछन्नं यथाभूत्तेन बलं महत्॥ यावद्रुद्रः प्रचिच्छेद तस्य बाणगणं त्वरात्॥ ता
वत्स परिघेणाशु जघान वृषभं बली॥ वृषस्तेन प्रहारेण पराङ्मुखो रणांगणात्॥ ९॥ कृष्टेनाकृष्य
माणोपि न तस्थौ रणभूमिषु॥ ततः परमसंक्रुद्धो रुद्रो रौद्रवपुर्धरः॥ १०॥ चक्रं सुदर्शनं वेगात्तच्चिक्षे
पादिसवर्चसं॥ प्रणदद्रोदसी वेगात्तत्क्षणाच्च जलंधरं॥ ११॥ जहार तच्छिरः कायात्महदायतलोचनं॥
रथात्कायः प्रपातास्य नादयन्वसुधातलं॥ १२॥ तेजश्चास्य निर्गतं देहात्तद्रुद्रे लयमागतं॥ वृंदादेहोद्भवं ते
जस्तद्गौर्यां लयमागतं॥ १३॥ अथ ब्रह्मादयो देवा हर्षोत्फुल्लविलोचनाः॥ प्रणम्य शिरसा रुद्रं सुर्वि
कुचेष्टितं॥ १४॥ देवा ऊचुः॥ महादेव त्वया देवा रक्षिताः शत्रुजाद्भयात्॥ किंचिदन्यत्समुद्भूतं तत्र किं क
रवामहे॥ १५॥ वृंदालावण्यसंभ्रांतो विष्णुस्तिष्ठति मोहितः॥ ईश्वर उवाच॥ गच्छध्वं शरणं देवा विष्णु
मोहापनुत्तये॥ शरण्यां मोहिनीं मायां सा वः कार्यं करिष्यति॥ १६॥ नारद उवाच॥ इत्युक्त्वांतर्दधे देवः
सह भक्तगणैस्तदा॥ देवाश्च तुष्टुवुर्मूलप्रकृतिं भक्तवत्सलां॥ १७॥ देवा ऊचुः॥ यदुद्भवाः सत्वरजस्तमो
गुणाः सर्गस्थितिध्वंसनिदानकारणाः॥ यदीच्छया विश्वमिदं भवाभवौ तनोति मूलप्रकृतिं नताः स्म
तां॥ १८॥ यदि त्रयोविंशतिधा दरीदृश्यते वेजगत्यनूपे समतिष्ठतापरा॥ यद्रूपकं मौण्यजनाश्रयो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२८

पितेदेवास्तुमूलप्रकृतिं नतास्म तां ॥१९॥ यद्भक्तियुक्ताः पुरुषास्तु नि संसारदुःखभीयो प्रहराभवानुं ॥ नमा
मुवं संबहि भक्तवत्सलां स देवमूलप्रकृतिं नतास्म तां ॥२०॥ स्तोत्रमेतत्त्रिसंध्यं यः पठेदेकाग्रमानसः ॥
दारिद्र्यदुःखमोहदुःखानि न कदाचित्स्पृशंति हि ॥२१॥ इत्थं स्तुवंतस्ते देवास्तेजोमंडलमास्थितं ॥ ददृशुर्गो
गनेतत्रज्वालाव्याप्तदिगंबरं ॥२२॥ तन्मध्याच्छारतीं सर्वे शुश्रुवुर्व्योमचारिणीं ॥ भक्तिरुवाच ॥ अह
मेवात्रिधा भिंनास्तिष्ठामि त्रिविधैर्गुणैः ॥ गौरी लक्ष्मीस्स्वरा चेति रजःसत्त्वतमोगुणैः ॥२३॥ तत्र गच्छ
त ताः कार्यं विधास्यंते थवः सुराः ॥२४॥ नारद उवाच ॥ शृण्वतामिति तां वाचमंतर्धानमगान्महः ॥
देवानां विस्मयोत्फुल्लनेत्राणां च तदा नृप ॥२५॥ ततः सर्वे पि ते देवा गत्वा तद्वाक्यनोदिताः ॥ गौरीं ल
क्ष्मीं स्वरां चैव प्रणेमुर्भक्तितत्पराः ॥२६॥ तास्तु यातान्सुरान्दृष्ट्वा प्रणतोभ्येत्येव वत्सलाः ॥ बीजानि
प्रददुस्तेभ्यो वाक्यानि च तदोचिरे ॥२७॥ श्रीदेव्य ऊचुः ॥ इमानि तत्र बीजानि विष्णुर्यत्रावतिष्ठति ॥
निर्वपध्वं ततः कार्यं भवतां सिद्धिमेष्यति ॥२८॥ नारद उवाच ॥ ततस्तु हृष्टाः सुरसिद्धसंघाः प्रगृह्य
बीजानि विचिक्षिपुश्च ॥ यं स्वाचिताभूमितले स यत्र विष्णुः सदा तिष्ठति सोऽस्य वृत्तिः ॥२९॥ इति श्रीप

द्मपुराणे कार्तिकमाहात्म्ये वसिष्ठसत्यभामासंवादे अष्टादशोऽध्यायः ॥१८॥ श्रीनारद उवाच ॥ क्षिप्तेभ्य
स्तत्र बीजेभ्यो वनस्पतयोऽभवन् ॥ धात्री च मालती चैव तुलसी च नृपोत्तम ॥१॥ स्वरोद्भवा स्मृता
धात्री माभवा मालती स्मृता ॥ गौरीभवा च तुलसी तमःसत्त्वरजोगुणाः ॥२॥ स्त्रीरूपिण्यो वनस्प
त्योद्दृष्ट्वा विष्णुस्तदा नृप ॥ उत्तस्थौ संभ्रमाद्दाह रूपातिशयविभ्रमः ॥३॥ ददृशे च तेन ता रागात्कामा
सक्तेन चेतसा ॥ तं चापि तुलसी धात्री रागेणैव विलोकिताम् ॥४॥ यत्तु लक्ष्म्या पुरा बीजमीर्ष्ययैव समर्पि
तम् ॥ तस्मात्तदुद्भवा नारी तस्मिन्नीर्ष्यापराभवत् ॥५॥ अतः सा बर्बरीत्याख्यामवापातीव गर्हिता ॥
धात्री तुलस्यौ तद्रागात्तस्य प्रीतिप्रदे सदा ॥६॥ अतो विस्मृतदुःखोऽसौ विष्णुस्ताभ्यां सहैव तु ॥ वैकुंठ
मगमद्धृष्टः सर्वदेवनमस्कृतः ॥७॥ कार्तिके धापने विष्णुस्तस्मात्सा तु विधीयते ॥ तुलसीमूलदेशे
च प्रीतिदा सा भवेत्सदा ॥८॥ तुलसीकाननं राजन्गृहे यस्यावतिष्ठति ॥ तद्गृहं तीर्थभूतं हि न यां
ति यमकिंकराः ॥९॥ सर्वपापहरं पुण्यं कामदं तुलसीवनं ॥ रोपयंति नरश्रेष्ठास्ते न पश्यंति
भास्करिम् ॥१०॥ दर्शनं नर्मदायास्तु गंगास्नानं तथैव हि ॥ तुलसीवनसंसर्गः सममेतत्त्रयं स्मृ
तं ॥११॥ रोपणात्पालनात्सेकाद्दर्शनात्स्पर्शनान्नृणां ॥ तुलसी दहते पापं वाङ्मनःकायसंचितं ॥१२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तुलसीमंजरीभिर्यः कुर्याद्धरिहरार्चनं ॥ नस गर्भगृहं याति मुक्तिभागी भवेन्नरः ॥१३॥ पुष्कराद्यानि तीर्था
२८ निगंगाद्याः सरितस्तथा ॥ वासुदेवादयो देवा वसंति तुलसीदले ॥१४॥ तुलसमंजरीयुक्तो यस्तु प्राणान्वि २८
मुंचति ॥ यमोपि नेक्षितुं शक्तो युक्तं पापशतैरपि ॥१५॥ तुलसीकाष्ठजं यस्तु चंदनं धारयेन्नरः ॥ तद्देहं न स्पृ
शेत्पापं क्रियमाणमपीह तत् ॥१६॥ तुलसीविपिनच्छाया यत्र यत्र भवेन्नृप ॥ तत्र श्राद्धं प्रकर्तव्यं पितॄणां
दत्तमक्षयं ॥१७॥ धात्रीछायासु यः कुर्यात्पिंडदानं नृपोत्तम ॥ घेसे धात्रीफलं यस्तु स विज्ञेयो हरिः स्वयं ॥१८॥
धात्रीफलं च तुलसीमृत्तिका द्वारकोद्भवा ॥ यस्य देहे स्थितान्यसौ जीवन्मुक्तः स उच्यते ॥१९॥ धात्रीफले
स्तु संमिश्रैस्तुलसीपत्रसंयुतैः ॥ जलैः स्नाति नरस्तस्य गंगास्नानफलं भवेत् ॥२०॥ देवार्चनं नरः कुर्या
द्धात्रीपर्णैः फलैस्तथा ॥ सौवर्णमणिमुक्ताद्यैरर्चनस्याप्नुयात्फलं ॥२१॥ तीर्थानि मुनयो देवा यज्ञाः स
र्वेश्च कार्तिके ॥ नित्यं धात्रीं समाश्रित्य तिष्ठंत्यर्के तुलां स्थिते ॥२२॥ द्वादश्यां तुलसीपत्रं धात्रीपत्रं च
कार्तिके ॥ लुनाति स नरो गच्छेन्निरयानतिगर्हितान् ॥२३॥ धात्रीछायां समाश्रित्य कार्तिके न्नं तु न
क्षिपेत् ॥ अन्नसंसर्गजं पापमावर्षं तस्य नश्यति ॥२४॥ धात्रीमूले च यो विष्णुं कार्तिके चार्चयेन्नरः ॥
विष्णुक्षेत्रेषु सर्वेषु पूजितस्तेन सः सदा ॥२५॥ धात्रीतुलस्योर्माहात्म्यमपि देवश्चतुर्मुखः ॥ न स

मर्थो भवेद्वक्तुं यथा देवस्य शार्ङ्गिणः ॥२६॥ धात्रीतुलस्योरुद्भवकारणं यः शृणोति हि श्रावयते च मर्त्यः ॥
विधूतपाप्मा सह पूर्वजैः स स्वर्गं व्रजेत्सद्विमानसंस्थः ॥२७॥ इति श्रीप० कार्तिकमा० सोनविंशोऽध्यायः ॥
॥१९॥ पृथुरुवाच ॥ सेतिहासमिमं ब्रह्मन्माहात्म्यं कथितं त्वया ॥ ये साश्रेयेकरं सम्यक्तुलस्याः स्तु
तं मया ॥१॥ यदुर्जे व्रतिनः पुंसः फलं महदुदाहृतं ॥ तस्मिन्नब्रूहि माहात्म्यं केन चीर्णं कथंचिदं ॥२॥
नारद उवाच ॥ आसीत्सह्याद्रिविषये करवीरपुरे पुरा ॥ ब्राह्मणो धर्मवित्कश्चिद्देवशर्मेति श्रुतः ॥
॥३॥ विष्णुव्रतकरः शश्वद्विष्णुपूजारतः सदा ॥ द्वादशाक्षरविद्याया जपनिष्ठोऽतिथिप्रियः ॥४॥ के
दाचित्कार्तिके मासि हरिजागरणाय सः ॥ रात्र्यां तुर्यांशशेषायां जगाम हरिमंदिरं ॥५॥ हरिपूजो
पकरणान्यग्रहीद्व्रजेत्तालदा ॥ तेन दृष्टा समायाता राक्षसी भीमनिस्वना ॥६॥ वक्रदंष्ट्राललज्जिह्वा
निमग्नारक्तलोचना ॥ दिगंबरा शुष्कमांसा लंबोष्ठा घर्घरस्वना ॥७॥ तां दृष्ट्वा भयसंत्रस्तः कंपिताव
यवस्तदा ॥ पूजोपकरणैर्वेगात्सयोभिश्च्याहनद्रुषा ॥८॥ संस्मृत्य हरेर्नाम तुलसीयुक्तवा
रिणा ॥ सो हन्तस्यातकं तस्मात्तस्याः सर्वं गतं क्षयं ॥९॥ अथ संस्मृत्य सा पूर्वजन्मकर्मविपाकजं ॥
स्वां दशां मद्यवीद्विप्रं दंडवच्च प्रणम्य सा ॥१०॥ कलहोवाच ॥ पूर्वकर्मविपाकेन दशामेतां गता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्म्यहं॥ तत्कथं तु पुनर्विप्र शुभां यास्युत्तमां गतिं॥११॥ नारद उवाच॥ तां दृष्ट्वा प्रणतामग्रे वेदमानां स्वक
र्मतत्॥ अतीव विस्मितो विप्रस्तद्वाक्यं वचनमब्रवीत्॥१२॥ धर्मदत्त उवाच॥ केन कर्मविपाकेन त्वं दशा
मीदृशीं गता॥ कुतस्त्वा का च किं शीला तत्सर्वं कथयस्व मे॥१३॥ कलहोवाच॥ सौराष्ट्रनगरे ब्रह्मन्
भिक्षुनामाभवद्द्विजः॥ तस्याहं गृहिणी पूर्वं कलहाख्यातिनिष्ठुरा॥१४॥ न कदाचिन्मया भर्तुर्वचसा
२२ पि शुभं कृतं॥ नार्पितं तस्य मिष्टान्नं न तु वै वचनप्रीतया॥१५॥ कलहप्रिययानित्यं ययोद्विग्नमनाप
सा॥ परिणेतुं तदान्यां च मतिं चक्रे पतिर्मम॥१६॥ ततोगरं समादाय प्राणांस्त्यक्ता मया द्विज॥ अथा २२
बद्ध्वा मां तु निन्युर्यमागमाः॥१७॥ यमश्च मां तदा दृष्ट्वा चित्रगुप्तमपृच्छत॥ यम उवाच॥
अनया किं कृतं कर्म चित्रगुप्त विलोकय॥१८॥ प्राप्नोत्वेषा कर्मफलं शुभं वाशुभमेव वा॥ चित्रगुप्तस्त
दा वाक्यं भर्त्सयन्मामुवाच ह॥१९॥ चित्रगुप्त उवाच॥ अनया तु शुभं कर्म कृतं किंचिन्न विद्यते॥ मि
ष्टान्नं भुंजमानेयं न भर्त्रे हि तदर्पितं॥२०॥ अतश्च वल्गुलीयोन्यां स्वविष्ठां भोक्तुमर्हति॥ भर्तृद्वेषा
त्सदा त्वेषा नित्यं कलहकारिणी॥२१॥ विष्ठादा शूकरीयोन्यां तस्मात्तिष्ठत्वियं हरे॥ पाकभांडसदा भुं
क्ते गुप्तं सैषा यतस्ततः॥२२॥ तस्मादेषा विडाल्यस्तु स्वजातापत्यभक्षिणी॥ भर्तारमपि चोद्दिश्य ह्यात्म

घातः कृतोनया॥२३॥ तस्मात्प्रेतशरीरेपि तिष्ठत्वेषातिनिंदिता॥ अतश्चैषा मरुदेशं प्रापितव्या भटैरिह॥२४॥
यत्र प्रेतशरीरस्था चिरं तिष्ठत्वियं ततः॥ तुर्यं योनिचयं चैषा भुनक्त्वशुभकारिणी॥२५॥ कलहोवाच॥ सा
हं पंचशताब्दानि प्रेतदेहस्थिता किल॥ क्षुत्तृड्भ्यां पीडिता सत्यं दुःखिता केन कर्मणा॥२६॥ ततः क्षुत्पीडिता
विश्य शरीरं वणिजस्त्वहं॥ आयांतं दक्षिणदिशं कृष्णावेण्योस्तु संगमं॥२७॥ तत्तीरं संश्रिता यावत्तस्य श
रीरतः॥ शिवविष्णुगणैर्दूरं मपाकृष्टा बलादहं॥२८॥ योनित्रयाद्दशो भोग्यादस्माच्च प्रेतदेहतः॥ ततःक्षुत्क्षो
भया दृष्टो त्वमस्याहं मया द्विज॥२९॥ ततस्तु तुलसीवारि संसर्गगतपापया॥ तत्कृपां कुरु विप्रेंद्र कथं मु
क्ता भवाम्यहं॥३०॥ इत्थं निशम्य कलहावचनं द्विजाग्र्यस्तत्कर्मकालभयविस्मयदुःखयुक्तः॥ तद्ग्लानिदी
नकृपाकलचित्तवृत्तिर्ध्यात्वा चिरं स वचनं निजगाद दुःखात्॥३१॥ ॥ इति श्रीपद्मपुराणे कार्तिक
माहात्म्ये धर्मदत्तकलहासंवादो नाम त्रिंशतितमोध्यायः॥३०॥ धर्मदत्त उवाच॥ विलयं यांति पा
पानि तीर्थदानव्रतादिभिः॥ प्रेतदेहस्थिता यास्ते तेषु नैवाधिकारता॥१॥ त्वद्ग्लानिदर्शनात्स्मा
दुःखितं च मम मानसं॥ नैव निर्वृतिमायाति हीनमुद्धृत्य दुःखिताः॥२॥ पातकं च तथा स्कंधं गतयोनि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३०

गेयपातकं॥ न बाल्यैः क्षीयते पुण्यैः प्रेतत्वं याति गर्हितं॥३॥ तस्मात्तज्जनितं यन्मया कार्तिकव्रतं।
तस्य पुण्यस्यार्धभागेन परां गतिमवाप्नुहि॥४॥ कार्तिकव्रतपुण्येन न साम्यं याति सर्वथा॥ यज्ञदानानि
तीर्थानि व्रतान्यपि यतो ध्रुवं॥५॥ नारद उवाच॥ इत्युक्त्वाथ स मंत्रतो सौ यावद्द्वादशाक्षरमभ्यषेचयत॥ तुलसी
मिश्रितोयेन श्रावयन् द्वादशाक्षरीम्॥६॥ तावत्तत्क्षणं निर्मुक्ता ज्वलदग्निशिखोपमा॥ दिव्यरूपधरा
जाता लावण्येन यथेंदिरा॥७॥ ततः सा दंडवद्भूमौ प्रणम्य नाममाथ तं द्विजं॥ उवाच च तदा वाक्यं ह
र्षगद्गदभाषिणी॥८॥ कलहोवाच॥ त्वत्प्रसादाद्द्विजश्रेष्ठ विमुक्ता निरयादहं॥ पापाब्धौ मज्जमाना
या त्वं नौरूपतोसि मे ध्रुवं॥९॥ नारद उवाच॥ इत्थं सा वदती विप्रं ददर्शायांतमंबरात्॥ विमानं भास्व
रं युक्तं विष्णुरूपधरैर्गणैः॥१०॥ अथ सा तद्विमानाग्रं द्वास्थाभ्यामवरोपिता॥ पुण्यशीलसु
शीलाभ्यामप्सरोगणसेविता॥११॥ तद्विमानं तदा पश्यन्धर्मदत्तोतिविस्मितः॥ पपात दंडव
द्भूमौ दृष्ट्वा तौ विष्णुरूपिणौ॥१२॥ पुण्यशीलसुशीलौ च समुत्थाप्याथ तं द्विजं॥ प्रसमभ्यनंदय
न्तौ वाक्यमूचतुर्धर्मसंयुतं॥१३॥ गणावूचतुः॥ साधु साधु द्विजश्रेष्ठ यस्त्वं विष्णुरतः सदा॥ ३०

दीनानुकंपी सर्वज्ञो विष्णुव्रतपरायणः॥१४॥ आबाल्यत्वात्त्वया सम्यक् धृतं यत्कार्तिकव्रतं॥ तद्व्रतस्यार्धदा
नेन पुण्यं द्विगुण्यमागतं॥१५॥ त्वत्पुण्यस्यार्धभागेन यदस्याः पूर्वसंचितं॥ जन्मांतरशतोद्भूतं पापं
तद्विलयं गतं॥१६॥ स्नानेनैव गतं पापं यदस्याः पूर्वकर्मजं॥ हरिजागरणाद्यैश्च विमानेभिदमाहृ
तं॥१७॥ वैकुंठं नीयते साध्वी नानाभोगसुतान्वितं॥ दीपदानस्य वै पुण्यैस्तेजसे रूपमाश्रिता॥१८॥
तुलसीपूजनाद्यैश्च कार्तिकव्रतकारणैः॥ विष्णुसान्निध्यगा जाता त्वद्यादत्तैः कृपालुना॥१९॥ त्वमप
स्या भवस्यांते भार्यया सह यास्यसि॥ वैकुंठभवनं विष्णोः सान्निध्यं च सरूपतां॥२०॥ ते धन्याः कृत
कृत्यास्ते तेषां च सफलो भवः॥ येन त्वयाराधितो विष्णुः किंन यच्छति देहिनां॥२१॥ औत्तानपादिर्यो
नभ्रेच्च ध्रुवे स्थापितः पुरा॥ यन्नामस्मरणादेव देहिनो यांति सद्गतिं॥२२॥ ग्राहग्रस्तो गजेंद्रो यन्ना
मस्मरणात्सदा॥ विमुक्तः सान्निध्यं प्राप्तः सोयं हरिजयसंज्ञितः॥२३॥ अतस्त्वयार्चितो विष्णुस्त्वसा
न्निध्यं प्रयास्यति॥ बहून्यब्दसहस्राणि भार्याद्वयसुतस्य ते॥२४॥ ततः पुण्यक्षये जाते यदा या
स्यति भूतलं॥ सूर्यवंशोद्भवो राजा विख्यातस्त्वं भविष्यसि॥२५॥ नाम्ना दशरथस्तत्र भार्या
द्वयसुतः पुनः॥ तृतीया या नया चाधिया ले पुण्यार्धभागिनी॥२६॥ तत्रापि तव सान्निध्यं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विष्णुर्यास्यति भूतले॥ आत्मानं तव पुत्रत्वे प्रकल्प्यामरकार्यकृत॥१७॥ तवाजन्म भवेतादृश्या हि विष्णु
संतुष्टिकारणात्॥ नयतानचेदानानी नतीर्थान्यपि कानिचे॥१८॥ यैर्न्यैस्त्वि प्राग्र्य तस्त्वयैतद्व्रतं श्री
तं तुष्टिकरं जगद्गुरोः॥ यद्दर्शं भागास फलं मुरारेः प्रणम्यते स्मानिरियं सलोकतां॥१९॥ ॥इति श्री
पद्मपुराणे का० कलहोत्तमलोकप्राप्तिर्नाम एकविंशतितमोऽध्यायः॥२१॥ श्रीनारद उवाच॥ इत्थं
तद्वचनं श्रुत्वा धर्मदत्तः सविस्मयः॥ प्रणम्य दंडवद्भूमौ वाक्यमेतदुवाच ह॥१॥ धर्मदत्त उवा
च॥ आराधयंति सर्वेपि विष्णुं भक्तार्तिनाशनं॥ यज्ञैर्दानैर्व्रतैस्तीर्थैस्तपोभिश्च यथाविधि॥
॥२॥ विष्णुप्रीतिकरं तेषां किंचित्सांनिध्यकारकं॥ यत्केवलानि चीर्णानि सर्वाण्यपि भवंति
हि॥३॥ गणावूचतुः॥ साधु साधु त्वया पृष्टं शृणुष्वैकाग्रमानसः॥ इतिहासं कथामत्र कथ्य
मानां पुरातनाम्॥४॥ कांचिपुर्यां पुरा चोलश्चक्रवर्ती नृपोऽभवत॥ यस्याद्भवेवते देशाश्चौला इ
तिप्रथां गताः॥५॥ यस्मिन्नृशासति भुवं चक्रे दारिद्र्यो नाति दुःखितः॥ पापबुद्धिः स रुग्वापि नैव
कश्चिद्भूत्नरः॥६॥ यस्याप्यनंतवीर्यस्य ताम्रपर्णातटावुभौ॥ सौवर्णैरोपयूपोभाद्यावी
स्तां चैत्ररथोपमौ॥७॥ स कदाचिद्गगाजा हनंतशयनं द्विज॥ यत्रास्ते जगतांनाथो योग

निद्रामुपासते॥८॥ तत्र श्रीरमणं देवं संपूज्य विधिवन्नृपः॥ माणिमुक्ताफलैर्दिव्यैः स्वर्णपुष्पैः सुशोभ
नैः॥९॥ प्रणम्य दंडवद्धावदुपविष्टः स तत्र वै॥ तावद्ब्राह्मणमायांतमपश्यदेव सन्निधौ॥१०॥ दिव्या
र्चनार्थमायांतं तुलस्युदकपाणिनं॥ स्वपुरवास्तिनं तत्र विष्णुदासाह्वयं द्विजं॥११॥ तत्रागत्ये
य स विप्रर्षिर्देवदेवमपूजयत्॥ विष्णुसूक्तेन संस्नाप्य तुलसीमंजरीदलैः॥१२॥ तुलसीपूज
यातस्य रत्नपूजां पुरा कृतां॥ आच्छादितां समालोक्य राजा क्रुद्धो ब्रवीद्दिदं॥१३॥ चोल उवा
च॥ माणिक्यस्वर्णपूजा चैशोभाढ्या या मया कृता॥ विष्णुदास कथं सेयमाच्छिन्ना तुलसीदलैः॥
॥१४॥ विष्णुभक्तिं न जानासि वराकोऽसि मतो मम॥ यस्त्वमामपिशोभाढ्यां पूजामाच्छादयस्यहो॥
॥१५॥ नारद उवाच॥ इतितद्वचनं श्रुत्वा स क्रोधः सद्विजोत्तमः॥ राज्ञो गौरवमुल्लंघ्य जगाद व
चनं तदा॥१६॥ विष्णुदास उवाच॥ राजन्भक्तिं न जानासि गर्वितोसि नृपश्रिया॥ किंचिद्विष्णुव्र
तं पूर्वं त्वया चीर्णं वदस्व तत्॥१७॥ गणावूचतुः॥ तद्ब्राह्मणवचः श्रुत्वा प्रहस्य नृपसत्तमः॥ वि
ष्णुदासं तदा गर्वाद्बभाषे वचनं द्विजम्॥१८॥ चोल उवाच॥ इत्थं चेद्दर्पसे विप्र वित्तहीनेषु भ
क्त्या लिगर्वितः॥ भक्तिरस्ते क्रियते विष्णोर्दरिद्रस्याधनस्य च॥१९॥ यज्ञदानादिकं चेद्यदिको

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्तुष्टिकरं हेतं ॥ नापि देवालयं पूर्वं स्वतं विप्र त्वया क्वचित् ॥ १० ॥ इदृशस्यापि ते गर्वः एवं तिष्ठति मन्दितः ॥ तच्छ्रु
त्वं तु वचो मह्यं सर्वे ये ते द्विजातयः ॥ ११ ॥ साश्चर्यकारमहं विष्णोरेव यास्ये गमिष्यति ॥ पश्यंतु सर्वे भितलतो मे
३२ त्क्रियास्यंति चावयोः ॥ १२ ॥ गणा ऊचतुः ॥ इत्युक्त्वा स नृपो गच्छन्नुनिजमात्मगृहं द्विजः ॥ आरंभ देवैः छवं सत्र ३२
षेणाचार्यं तु मुद्गलं ॥ १३ ॥ ऋषिसंघसमातुष्टं वेदसं नवकुर्द द्विजोत्तमं ॥ यथाकालं सेतं पूर्वं गयाक्षेत्रे समाह्वयन्
तु ॥ १४ ॥ विष्णुदासोपि तत्रैव तस्थौ देवालये व्रती ॥ पंचैतानि यमान्तु वे विष्णुतुष्टिकरान् सदा ॥ १५ ॥ माघो
लीयोव्रतं सम्यक् तुलसीवनपालनं ॥ एकादशीव्रतं चैव द्वादशाक्षरविद्यया ॥ १६ ॥ उपचारैः षोडशभि
र्नैवेद्यगीतादिमंगलैः ॥ नित्यं विष्णोस्तथा पूजाव्रतान्येतानि सोकरोत् ॥ १७ ॥ स्मरन् नित्यं स्मरन्विष्णुं
गच्छन्भुंजन्स्वपन्नपि ॥ सर्वं भूतगतं विष्णुं मन्ये चैसमदर्शनं ॥ १८ ॥ माघकार्तिकयोर्नित्यं विशे
षनियमाव्रति ॥ अकरोद्विष्णुतुष्ट्यर्थं सोद्यापनविधिं तदा ॥ १९ ॥ नारद उवाच ॥ एवं समाराधयतोः
श्रियःपतिं तयोर्द्वयोः चोलेश्वरविष्णुदासयोः ॥ अगात्कालो बहुतद्व्रतस्थयोस्तानिछसर्वेंद्रिय
कर्मणोस्तदा ॥ २० ॥ ॥ इति श्रीपद्मपुराणे कार्तिकमाहात्म्ये चोलोपाख्याने ...ध्यायः ॥ ॥ गणा
ऊचतुः ॥ कदाचिद्विष्णुदासोथ कृत्वानित्यविधिं द्विजः ॥ पाकं कर्माकरोत्तावद्दहरलोपलक्षितः ॥ १ ॥

लमदृश्यसोपाकं पुनर्नैवाकरोत्तदा ॥ सायंकालार्चनस्यास्याप्यतभंगभयाद्द्विजः ॥ २ ॥ द्वितीये हि गतःपा
कं हृत्वा यावत्संविष्टवे ॥ उपहारार्पणं कर्तुं गतः कोप्यहरत्पुनः ॥ ३ ॥ एवं स सप्तदिनं तस्य पाकं कोप्यहरद्द्विजः ॥
ततः सविस्मयाविष्टो मनस्येवं विचारयत् ॥ ४ ॥ अहो नित्यं स मन्येस्य कः पाकं हरते मम ॥ क्षेत्रसंन्या
सिन स्थानमत्याज्यं मम सर्वथा ॥ ५ ॥ पुनः पाकं विधायाचेत् नुस्यते यदि चेन्मया ॥ सायंकालार्चनं चैव
परित्याज्यं कथं भवेत् ॥ ६ ॥ यदि पाकं विधायैव भोक्तव्यं तु मया न तत् ॥ अनिवेदितेरन्नं वैष्णवेन तु
भुज्यते ॥ ७ ॥ उपोषितोहं सततं तिष्ठाम्यत्र व्रते स्थितः ॥ अद्य संरक्षणं सम्यक् पाकस्यात्र करोम्यहं ॥
८ ॥ इत्युक्त्वा मंदीनवदनमश्च चामीवृक्षोपितं ॥ तमालोक्य द्विजाग्र्यो भत्क्षपयाश्विनमानसः ॥ ९ ॥
विलोक्यां न हरं विप्रस्तिष्ठति स्य धावत ॥ कथमस्ति भवान्रक्षं घृतमेतत्हरन् भो ॥ १० ॥ इत्य
भूवं तं विप्राग्र्यमाधावंतं सविलोक्य च ॥ वेगाद्धावंतजीसाम्... तत्र पपात सः ॥ १२ ॥ भीतं सं
र्छितं दृष्ट्वा चांडालं स द्विजाग्रणीः ॥ वेगाद्दम्येत्य स रूपयात्स्ववस्त्रांतेरवीजयत् ॥ १३ ॥ अथोत्थितं त
मेवासौ विष्णुदासो व्यकल्पयत् ॥ साक्षान्नारायणं देवं शंखचक्रगदाधरं ॥ १४ ॥ पीतांबरं च
तुर्बाहुं श्रीवत्सांकं किरीटिनं ॥ अतसीपुष्पसंकाशं कौस्तुभोरसि हे विभुं ॥ १५ ॥ तं दृष्ट्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सात्विकैर्भावैरावृत्तो द्विजसत्तमः ॥ स्तोतुं चापि नमस्कर्तुं तदा नालं बभूव सः ॥१६॥ अथ पुण्यादयो दे
वास्तत्रैवाप्ययुस्तदा ॥ गंधर्वाप्सरसश्चापि जगुश्च ननृतुस्तदा ॥१७॥ वि[illegible]ते मो भूतसंकीर्णं देवर्षि
गणसेवितं ॥ गीतवादित्रनिर्घोषं तस्थाने तदभवत्तदा ॥१८॥ ततो विष्णुः समालिंग्य स्वभक्तं सात्विका
३३ वृतं ॥ सारूप्यमात्मनो दत्वानयद्वैकुंठमंदिरं ॥१९॥ विमानवरसंस्थं तं गच्छंतं विष्णुसंनिधिं ॥ दृष्ट्वा तत्रै ३३
लनृपतिर्विष्णुदासं ददर्श सः ॥२०॥ वैकुंठभवनं यातं विष्णुदासं विलोक्य सः ॥ स्वगुरुं मुद्गलं वेगा
दाह्वयेत्थं वचोऽब्रवीत् ॥२१॥ यत्स्पर्धया मया चैतद्यज्ञदानादिकं कृतं ॥ स विष्णुरूपधृग्विप्रो याति
वैकुंठमंदिरं ॥२२॥ दीक्षितेन मया सम्यक् सत्रेऽस्मिन्वैष्णवे मखे ॥ हुतं मन्नौ कृता विप्रा दानाद्यैः पूर्ण
मानसाः ॥२३॥ न चाद्यापि समे देवः प्रसन्नो ज्ञायतेऽद्य वै मम ॥ भक्त्यैव तस्य विप्रस्य साक्षात्कारं ददौ ह
रिः ॥२४॥ तस्माद्दानैश्च यज्ञैश्च नैव विष्णुः प्रसीदति ॥ भक्तिरेव परं तस्य निदानं दर्शने विभोः ॥२५॥
इत्युक्त्वा भागिनेयं स्वमभ्यषिंचन्नृपासने ॥ आबाल्याद्दीक्षितो यज्ञे ह्यपुत्रत्वमगादतः ॥२६॥ तस्मा
द्याप्यतद्देशे सदा राजां तु भागिनः ॥ स्वस्त्रियाएव जायंते तत्पापावधिवर्तिनः ॥२७॥ यज्ञवाटं त

तोऽभ्येत्य स वह्निकुंडाग्रतस्थितः ॥ मुद्गलस्तु तदा क्रोधाच्छिखामुत्पाटयन्स्वकां ॥२८॥ ततस्त्वचापितज्ञोत्रेत्युज
लो विशिखो भवत् ॥ तावदाविर्भवद्विष्णुः कुंडाग्नौ भक्तवत्सलः ॥२९॥ तमालिंग्य विमानाग्रं समारोहय
दच्युतः ॥ तस्यैवात्मसारूप्यं दत्वा वैकुंठमंदिरं ॥३०॥ तेनैव सह देवेशो जगाम त्रिदशैर्वृतः ॥ नारदउ
वाच ॥ यो विष्णुदासः स तु पुण्यशीलो यश्चोलभूपः स तु पुण्यनामा ॥ आवामुभौ तत्समभाकपोजौ
द्वारस्थौ कृतौ तेन रमाप्रियेण ॥३१॥ ॥ इति श्रीपद्मपुराणे कार्तिकमा॰ विप्रचोलोद्धरणो नाम त्रयोविं
शोऽध्यायः ॥२३॥ धर्मदत्त उवाच ॥ जयश्च विजयश्चैव विष्णुद्वास्थौ पुराश्रुतौ ॥ किं तु ताभ्यां पुराची
र्णं यस्मात्तद्रूपधारिणौ ॥१॥ गणावूचतुः ॥ तृणबिंदोस्तु कन्यायां देवहूत्यां पुराभवत् ॥ कर्दमस्य तु
तु ष्ठेय पुत्रौ द्वौ संबभूवतुः ॥२॥ ज्येष्ठो जयः कनिष्ठो मद्विजय इति नामतः ॥ तस्यामेवाभवत्पश्चा
त्कपिलो योगधर्मवित् ॥३॥ जयश्च विजयश्चैव विष्णुभक्तिरतौ सदा ॥ तौ नित्यं हृदियन्निग्रामोध्यमे
त्रौलौ बभूवतुः ॥४॥ नित्यमष्टाक्षरीजाप्यौ विष्णुव्रतकरावुभौ ॥ साक्षात्कारं ददौ विष्णुस्तयो
र्निसार्चने सदा ॥५॥ मरुत्तेन कदाचित्तौ व्याहूतौ यज्ञकर्मणि ॥ जग्मतुर्यतो कुशलौ देवर्षिगण
पूजितौ ॥६॥ जयस्तत्राभवद्ब्रह्मा विजयो याजको भवत् ॥ ततो यज्ञविधिं सर्वं परिपूर्णं च चक्रतुः ॥७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३४

मत्तोयम्हं तस्मात्ताभ्यां वितदंरैवहु॥ तत्समादाय तौ विष्वक्सेनं जग्मतुः स्वाश्रमं प्रति॥८॥ यदुनाथ
पथ विष्णोः स्तुष्यर्थं तौ तदा मुनी॥ तद्धनं विभजंतौ तु पस्पर्धाते परस्परं॥९॥ जयोब्रवीत्समो भा
गः क्रियतामिति तत्र सः॥ विजयश्चाब्रवीत्तत्र यल्लब्धं तस्य तद्भवेत्॥१०॥ ततः शापं जयः क्रोधा
द्विजयं स्तुब्धमानसः॥ गृहीत्वा न ददास्येतत् तस्माद्ग्राहो भवेति तं॥११॥ विजयस्तस्य तं शापं श्रु
त्वा सोप्यशपच्च तं॥ मदमत्तो यतस्त्वं मातंगस्तां गतो व्रज॥१२॥ ततस्तदा च रथ्यन्तु विष्णुं दृष्ट्वानिया
चेनेविलुं॥ शापयोश्च निवृत्तिं तौ यथाचाते रमापतिं॥१३॥ जयविजयावूचतुः॥ भक्तौ आवां कथं
देवग्राहमातंगयोनिगौ॥ भविष्यावः शापसिंधौ तच्छापो विनिवर्त्यतां॥१४॥ श्रीभगवानुवाच॥
मद्भक्तयोर्वचो सत्यं न कदाचिद्भविष्यति॥ मयापि नान्यथा कर्तुं शक्यते वै कदाचन॥१५॥ प्रल्हा
दवचनात्स्तंभे ह्याविर्भूतोस्म्यहं पुरा॥ तथांबरीषवाक्येन गर्भवासेष्यहं किल॥१६॥ तस्माद्युवा
भिमौ शापावनुभूय स्वयं कृतौ॥ लभेतां मत्सदनि स्यमित्युक्त्वांतर्दधे हरिः॥१७॥ गणावूचतुः॥
ततः स्तौ ग्राहमातंगौ वभूवतुः गंडकीतटे॥ जातिस्मरौ सुतद्योन्यामपि विष्णुव्रते स्थितौ॥१८॥ ३४

कदाचित्सगजः स्नातुं कार्तिके गंडकीं ततः॥ तावज्जग्राह तं ग्राहः संस्मरन् शापकारणं॥१९॥ ग्राहगृहीतो मातंगोऽप्य
स्मराच्छ्रीपतिं तदा॥ तावदाविर्बभूवाथ विष्णुः शंखचक्रगदाधरः॥२०॥ ततः स ग्राहमातंगौ चक्रेणिहत्य समुद्धृतौ॥
दत्वा च निजसारूप्यं वैकुंठमनयद्द्विज॥२१॥ तदाप्रभृति तत्स्थानं हरिक्षेत्रमिति स्मृतं॥ चक्रसंघर्षणाद्ध
स्मिन्नद्याः पाषाणोपि हि लांछिताः॥२२॥ ताविमौ विष्णुभक्तौ लोके जयश्च विजयश्च हा॥ निर्यं विष्णुप्रियौ द्वास्थौ
पृष्टौ यो हि त्वया द्विज॥२३॥ त्वमपि धर्मनिर्यं विष्णुव्रते स्थितः॥ सकुमात्सर्यदंभोपि भव स्वस
मदर्शनः॥२४॥ तुलामकरमेषेषु प्रातःस्नायी सदा भव॥ एकादशीव्रतनिष्ठस्तुलसीवनपालकः॥२५॥ ब्राह्म
णान्यगांश्चापि वैष्णवांश्च सदा भज॥ मसूरिकामारनालं वंताकमपि वैसर्ज॥२६॥ एवं त्वमपि देहांते तन्
द्विष्णोः परमं पदं॥ प्राप्नोषि धर्मदत्त त्वं तद्भक्त्यै यथा वयं॥२७॥ तावन्नेजन्मे व्रतादस्माद्विष्णुसंतुष्टिका
रकात्॥ न यज्ञा न च दाना नि न तीर्थान्यधिकानि वै॥२८॥ इत्थं तौ धर्मदत्तं तमुपदिश्य विमानगौ॥ तया
कलहया सार्धं वैकुंठं भवनं गतौ॥२९॥ धर्मदत्तोपि सौ यातः प्रत्यहं तद्व्रते स्थितः॥ देहांते तद्विष्णोः सा
नं भार्याभ्यामन्वितोऽभ्यगात्॥३०॥ इतिहासमिमं पुण्यं शृणुयाच्छ्रावयते च यः॥ पुमान्॥ हरेः सं
निधिकारिणीं मतिं लभते सौख्यपाजगद्गुरोः॥३१॥ इं श्रीपद्मपुराणे कार्तिकमाहात्म्ये धर्मदत्त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गणसंवादो नाम चतुर्दशीतमोध्यायः ॥१४॥ पृथुरुवाच ॥ कोऽसावेण्योस्तदा घस्माछिवविष्णुगणेऽप्रसा
वणि कुमारी राकेले हानिरस्ता कथिता त्वया ॥१॥ ब्रह्मा वीर्यं तयोर्नेयोः किं वा सेत्र स्यतस्य च ॥ तन्मे कथ
य धर्मज्ञ चित्रस्य योमे महान् भवेत् ॥२॥ नारद उवाच ॥ रुद्राक्षच्छत्रतनुः साक्षाद्ब्रह्मणी देवो महेश्वरः ॥ तं सेंगम
३५ प्रभावं तु नालं वक्तुं चतुर्मुखः ॥३॥ तथापि तत्समुत्पत्ति कीर्तयिष्यामि तां शृणु ॥ वास्तुष्पसंतरे पूर्वं म
नोर्दक्षः पितामहः ॥४॥ सहाद्भिः श्रीस्वरे रम्ये यज्ञनायोधतो भवेत् ॥ सकलाया यत्र संभारान् सर्वदेवगणो ३५
ह्वैतः ॥५॥ मुक्तो हरिहराभ्यां हितजिरेः श्रीस्वरं ययौ ॥ कम्बादयो मुनिगणा मुहूर्ते ब्रह्म दैवते ॥६॥ तस्य
दीक्षा विधानाय समारंभं विधानतः ॥ अथ ज्येष्ठां स्वरां पत्नीं मादयां चतुरीश्वरी ॥७॥ सा ह्याने
यो ता वह्निगुर्विष्णुमुवाच ह ॥ नारद उवाच ॥ विष्णो स्वरात्वं राहुतोप्याशात्तानहिसत्वरं ॥८॥ मुहूर्तोति
क्रमश्चैव कार्यो दीक्षाविधिः कथम् ॥ विष्णुरुवाच ॥ नायातिचेत्स्वरा शीघ्रं गायत्र्यत्र विधीयतां ॥९॥
एकापि न भवेदस्य भार्या किं पुण्यकर्मणि ॥ नारद उवाच ॥ एवमेव भृगुरुद्रोपि विष्णोर्वाक्यमम न्य
त ॥१०॥ तच्छ्रुत्वा सत्वरं गुर्वाक्यं गायत्री ब्राह्मणस्तदा ॥ निवेश्य दक्षिणे भागे दीक्षाविधिमथाक
रोत् ॥११॥ यावद्दीक्षाविधिं तस्य विधेश्चक्रे मुनीश्वराः ॥ तावदभ्यायौ तत्र स्वरा यज्ञस्थलं नृप ॥१२॥

ततः सा दीक्षितां दृष्ट्वा गायत्रीं ब्रह्मणा सह ॥ सहेर्ष्या परमक्रोधा त्वरा वचनमब्रवीत् ॥१३॥ स्वरोवाच ॥ अ
पूज्या यत्र पूज्यंते पूज्यानां तु व्यतिक्रमः ॥ त्रीणि तत्र भविष्यंति दुर्भिक्षं मरणं भयं ॥१४॥ मदासने क निविष्टे
भवद्भिः संनिवेशिता ॥ तस्मात्सर्वे जडीभूताः नदीरूपा भविष्यथ ॥१५॥ इयं च दक्षिणे भागे ह्युपविष्टा म
दासने ॥ तस्माल्लोकैः सदा दृश्या तनुरूपास्तु निम्नगा ॥१६॥ नारद उवाच ॥ ततस्तद्वाक्यमाकर्ण्य गायत्री
कुपिता धरा ॥ समुत्थाय प्रपदे वैवीर्यमाणापि तां स्वरां ॥१७॥ गायत्र्युवाच ॥ तव भर्ता यथा ब्रह्मा मा पे
वस्त्वथा स्वल्प ॥ यथा प्रापत्स्वं मां यस्माद्भवत्वमपि निम्नगा ॥१८॥ नारद उवाच ॥ ततो हाहा कृतोः सर्वे गीर्वा
विष्णुमुखाः सुराः ॥ प्रणम्य दंडवद्भूमौ स्वरां तत्र व्यजिज्ञपुः ॥१९॥ देवा ऊचुः ॥ देवि सर्वे वयं शापात् ब्रह्मापा
प त्वया धुना ॥ यदि सर्वे जडीभूता भविष्यामो त्र निम्नगाः ॥२०॥ तदा लोकत्रयं ह्येतत् विनश्यति नि विभ्रि
तं ॥ अविवेकः कृतस्तस्मात्कोपोयं विनिवर्ततां ॥२१॥ स्वरोवाच ॥ नार्चितो य गणाध्यक्षो यज्ञादौ यत्सु
रोत्तमाः ॥ तस्माद्विघ्नं समुत्पन्नं मत्क्रोधाज्जनितं खलु ॥२२॥ नापि तद्वचनं ह्येतद् असत्यं खलु जायते ॥
तस्मात्स्वांशैर्जडीभूता यूयं भवत निम्नगाः ॥२३॥ आवामपि सपत्न्यौ च स्वांशेनाभ्यामेव निम्नगे ॥ भ
विष्यावोत्र भो देवाः पश्चिमाब्धि सुखावहे ॥२४॥ नारद उवाच ॥ इति तद्वचनं श्रुत्वा ब्रह्माविष्णुमहेश्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रः॥ जडीभूता भवंन यः स्वांद्रौ रेव तस्तत्र पा॥२५॥ तत्र विष्णुर भूत्वैव छायावेण्या देवो महेश्वरः॥ अलाभ कुम
नी चापि पत्थयो व बभूवतुः॥२६॥ देवाः स्वपि तानं शूना नजडीके सविचिक्षिपुः॥ स ह्यान्द्रि पूर्वर भ्यस्ता पथ
मासं तुलिमन्नगाः॥२७॥ देवांशः पूर्वे वाहिन्यो बभूवतुः पश्चिमामुखाः॥ ते पल्वं च पथकृ तत्रशृत गोथस
ह स्वशः॥२८॥ गायत्री चैव सा चेति पश्चिमाभि मुखी तदा॥ योगेन वा भवंन पंचत्वा विज्ञी तिप्रथांगते॥२९॥
३९ ब्रह्मणास्थापितौ तत्र यज्ञे हरिहरावुभौ॥ महाबलातिबलिनौ नाम्ना देवावभूवतुः॥३०॥ तयोन वा ३९
स्तु माहात्म्ये नाहं वक्तुं क्षमो न पा॥ ययो ब्रह्मादयो देवाः स्वांद्रौ गिस्ते छंति चाश्रयः॥३१॥ कृष्णाद्भवं पा
पहरं स्त्रीवं यः शृणोति यः॥ भावयते चैव ज्ञेया॥ स्यात स्यपु सः सकलं फलं यत्तद्वान स्नान गमेक्ष्ण
वंस्मृतं॥३२॥ इति श्रीपद्मपुराणे कार्तिके० पंचविंशति तमोध्यायः॥२५॥ छ ॥ श्रीकृष्णउवा
च॥ इति तद्वचनं श्रुत्वा पृथुर्विस्मितमानसः॥ संपूज्य नारदं भक्त्या विससर्ज ततः प्रिये॥१॥ त
स्मात्वत्रयं ह्येतन्ममातीव प्रियंकरं॥ माघकार्तिकयोस्तु व्रतपंचैकादशीव्रतं॥२॥ वनस्पती
नां तुलसी मासानां कार्तिको वरः॥ एकादशी तिथीनां च क्षेत्राणां द्वारकाममः॥३॥ एतेषां सेव
नं यस्तु करोति नियतेंद्रियः॥ सममे वल्लभतां याति न तथा यजनादिभिः॥४॥ पापेष्योन भयं

तेन कृतेव्यं नियमादपि॥ एतेषां सेवनं कांते कुर्वंतां मत्परायणं॥५॥ सत्योवाच॥ विस्मापनी
यं तं नाथ तत्वया कथितं मम॥ परदत्तेन पुण्येन कथं हा मुक्तिमागता॥६॥ इदं प्रभाव स्ते मासे का
र्तिको ति प्रियो मम॥ स्वामि द्रोहादि पापानि स्नानदानैर्गतानि यत्॥७॥ दत्ते चैव हि भते पुण्यं त
स्य रेण लतं च यत्॥ अदत्तं केन मार्गेण लभ्यते ज्ञानवेति भा॥८॥ श्रीकृष्णउवाच॥ देशान्यपि
च पुण्यानि पापानि च यथा नरैः॥ प्राप्यते कर्मणा स्वेन यथा वत्तन्निशामय॥९॥ देशग्रामकु
लानि स्युर्भोगभाञ्जि कृतादिषु॥ कलौ तु केवलं कर्म फलं तु कर्तुपुण्य पापयोः॥१०॥ भुज्यते पि
हि संसर्गत्य व स्थियमुदाहृता॥ संसर्गे संगतोः पुण्य पापानि यांति तानि निबोध तत॥११॥ एकत्रे
मैथुनाद्यानादेक पात्रस्थभोजनात॥ अर्द्धं तु प्राप्नुयात्पुर्णं वर्षेण पथा व पुण्यपापयोः॥१२॥
अध्यापनाद्याजनाद्वाप्येकत्रयैशूनादपि॥ तुर्यांशं पुण्यपापानि परो हस्ते लभते नरः॥
॥१३॥ एकासनादेक पानान्निश्वासादंगसंगतः॥ षडंशं फलभागी स्यात्संगतपुण्यपापयोः॥१४॥
स्पर्शनाद्राषणाद्वापि परस्य स्तवनादपि॥ दशांशं पुण्यपापानि निसंप्राप्नोति मानवः॥१५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दर्शनश्रवणाभ्यां च मनोध्यानात्तथैव च ॥ परस्य पुण्यपापानां भागं प्राप्नुयान्नरः ॥१६॥ पर
स्य निंदां पैशुन्यं धिक्कारं च करोति यः ॥ तत्कृतं पातकं प्राप्य स्वपुण्यं च ददाति सः ॥१७॥ कुर्वतः
पुण्यपापानि सेवां यः कुरुते नरः ॥ पत्नीभृतकशिष्येभ्यो यदन्यः कोपि मानवः ॥१८॥ तस्य से
३८ वानुरूपं च द्रव्यं किंचिन्न दीयते ॥ सोपि सेवानुरूपेण तत्पुण्यफलभाग्भवेत् ॥१९॥ एकपं ३८
क्त्याश्रये तां स्तु लंघयन्परिवेष्यते ॥ तस्य पुण्यषडंशं तु स लंघयस्तु लंघितः ॥२०॥ स्ना
न संध्यादिकं कुर्वन्यः स्पृशेद्वा प्रभाषते ॥ तत्पुण्यकर्मषष्ठांशं दद्यात्स्पृष्टनिश्चितं ॥२१॥
धर्मोद्देशेन यो द्रव्यं परं याचयते नरः ॥ तत्पुण्यकर्मजं तस्य धनदः प्राप्नुयात्फलं ॥२२॥ अप
हृत्य परं द्रव्यं पुण्यकर्म करोति यः ॥ कर्मकृत्पापमाप्नोति धनिनस्तत्फलं स्मृतं ॥२३॥ नोप
कृत्य ऋणं यस्तु परस्य म्रियते नरः ॥ धनी तत्पुण्यमादत्ते स्वधनस्यानुरूपतः ॥२४॥ बुद्धि
दस्त्वनुमंता च यश्चोपकरणप्रदः ॥ बलदश्चापि षष्ठांशं प्राप्नुयात्पुण्यपापयोः ॥२५॥

प्रजायाः पुण्यपापानां राजा षष्ठांशमुद्धरेत् ॥ शिष्याद्गुरुः स्त्रियो भर्ता पिता पुत्रात्तथैव च ॥२६॥
स्वपतेरपि पुण्यस्य योषिदर्धमवाप्नुयात् ॥ चेत्तस्यानुव्रतं शुश्चदत्ते तेलुष्टिकारिणी ॥२७॥ पर
हस्तेन दानानि कुर्वतः पुण्यकर्मणः ॥ विना भृत्यकपुत्राभ्यां कर्ता षष्ठांशमाप्नुयात् ॥२८॥ वृ
त्तिदो वृत्तिसंभोक्तुः पुण्यं षष्ठांशमाहरेत् ॥ आत्मनो वापरस्यापि यदि सेवां न कारयेत् ॥२९॥
इत्थं स्वदत्तान्यपी पुण्यपापान्यायांति निस्संपरसंचितानि ॥ अदुष्टचारस्तु निजिहासमग्रं पु
राणवृत्तं पुण्यमिति प्रदं च ॥३०॥ इति श्रीपद्मपुराणे कार्तिकमाहात्म्ये षड्विंशतिमोध्यायः ॥
॥२६॥ ॥ श्रीकृष्ण उवाच ॥ पुरा ह्यवंतिपुरीवासी धनेश्वरः ॥ ब्राह्मणः कर्मपरिभ्रष्टः
परदाररसु दुर्मतिः ॥१॥ रसेकं बलचर्माद्यैः सो रसस्यानृतयंतकः ॥ वेश्या सुरापानद्यूत
संततसमानसः ॥२॥ देशाद्देशांतरं गच्छन्क्रयविक्रयकारणात् ॥ माहिष्मतीपुरीमागात्
कदाचित्स धनेश्वरः ॥३॥ माहिष्मती यस्मात्तस्मात् माहिष्मतीस्मृता ॥ यस्यां वप्रगताभां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१८ तिनमे दापापनाशिनी ॥४॥ कार्तिके व्रतिनस्तत्र नाम्ना मागतान्नरान् ॥ स दृष्ट्वा विस्मयं कुर्वन् १८
मासमेकमुवास सः ॥५॥ स निःस्वं न मे दातीरे अमन्निक्रियकारणात् ॥ ददर्श श्रमणं स्नानजपदे
याश्चैवेरतान् ॥६॥ कांश्चित्पुराणान्पठतः कांश्चिच्छ्रवणे रतान् ॥ नृत्यगायनवादित्रविष्णु
स्तुतिपरायणान् ॥७॥ विष्णुमुद्रांकितान्कांश्चिन्मालातुलसिधारिणः ॥ तान्दृष्ट्वा कौतुको
विष्टस्तत्र तत्र धनेश्वरः ॥८॥ निःस्वं परिभ्रमंस्तत्र ददर्श नरसंभाषणात्तु ॥ वैष्णवानां तथा विष्णो
र्नामस्मरणकीर्तनात् ॥९॥ एवं मासे स्थिते सोथ कार्तिकोद्यापनं विधिं ॥ क्रियमाणं ददर्शासौ
भक्तैर्जागरणं हरेः ॥१०॥ पौर्णमास्यां तथा विष्णुविप्रगोपूजनादिकं ॥ दक्षिणाभोजनाद्यं च ह्रि
यमाणं व्रतस्थितैः ॥११॥ ततोस्तमये चैव दीपोत्सवविधिं तथा ॥ क्रियमाणं ददर्शाथ श्री
प्रत्यर्थं त्रिपुरद्विषः ॥१२॥ त्रिपुराणां कृतो दाहो यतस्तस्यां शिवेन तु ॥ अतस्तु क्रियते तस्यां
तिथौ भक्तैर्महोत्सवः ॥१३॥ विष्णोरुद्रस्य यः कश्चिदंतरं परिकल्पयेत् ॥ तस्य पुण्यक्रियाः

सर्वा निष्फलास्तु न संशयः ॥१४॥ तत्र नृत्यादिकं पश्यन्नेवं भ्रमन् स धनेश्वरः ॥ तावत्सोऽहिना दष्टो
विकलः स पपात ह ॥१५॥ द्विजास्तं पतितं दृष्ट्वा परिवब्रुः कृपान्विताः ॥ तुलसीमिश्रितैस्तोयैः स्तन्मु
खं सिषिचुस्तदा ॥१६॥ अथ देहं परित्यक्तं तं बध्वा यमकिंकरैः ॥ ताडमानं कषाघातैर्निन्युः संयमि
नीं रुषा ॥१७॥ चित्रगुप्तस्तु तं दृष्ट्वा निर्भर्त्स्यावेदयत्तदा ॥ यमायानेन बाल्यात्प्रभृति दुष्कृतं कृतं ॥
॥१८॥ नैवास्य दृश्यते किंचित्सुकृतं बाल्यतः कृतं विभो ॥ दुष्कृतं दृश्यते बहु वर्षेणापि न भास्क
रे ॥१९॥ पापमूर्तिरियं साक्षात्केवलं दृश्यते विभो ॥ तस्मादाकल्पमयोऽयं निरये पच्यतां विभो ॥
॥२०॥ श्रीकृष्ण उवाच ॥ निशम्येत्थं वचः सोथ धर्मराजः स किंकरान् ॥ ददर्श यम आह नो रूपकाला
न्विसहसा भवं ॥२१॥ यम उवाच ॥ भो भो प्रेतपते त्वेनं बध्यमानं स्वमुद्गरैः ॥ कुंभीपाके क्षिप
त्वाशु दुष्टं कल्मषनाशनं ॥२२॥ ततो मुद्गरनिर्भिन्नमस्तकं तं प्रेतपो नयत् ॥ कुंभीपाके क्षिपत्सा
शु स तैलं क्वथ उद्धृते ॥२३॥ या वह्नितप्तस्तु तत्रासौ तावच्छीतलतां ययौ ॥ कुंभीपाके यथा
वह्निः प्रल्हादस्ये पनामुरा ॥२४॥ तं दृष्ट्वा महदाश्चर्यं प्रेतपो विस्मयान्वितः ॥ वेगादागत्य तत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्यैं यमायाविदयत्तदा॥२८॥ यमस्तु तौ तु कं दृष्ट्वा प्रेतपेन निवेदितं॥ आ किमेतदिति प्रोच्यत
मानीय विचारयत्॥२५॥ तावदभ्यागतस्तत्र नारदः प्राह सत्वरः॥ यमेन पूजितः सम्यक् कृतदृष्टा
वाक्यमब्रवीत्॥२७॥ नारद उवाच॥ नैवायं निरयानर्हो तु कुं स्त्वमः सवित्वं दम्॥ यस्मादेतस्य सं
४१ जातं कर्म यन्निरयापहं॥२८॥ यः पुण्यकर्मणां कुर्याद् दृष्टिं स्पर्शं भाषणं॥ तस्य षष्ठांशमवाप्नोति ४१
पुण्यस्य नियतं नरः॥२९॥ संख्यातीतैस्तु संसर्गं कृतवानेष वै द्विजः॥ कार्तिकव्रतिभिर्मोक्षै
तस्मात्पुण्यांशभागयं॥३०॥ परिचर्याकरं कर्म संपूर्णं व्रतपुण्यभाक्॥ अस्योजे व्रतिसंभूता
पुण्यसंख्या न विद्यते॥३१॥ कार्तिकव्रतिनां पुंसां पातकानि महांत्यपि॥ प्रदहेद्दहनः सहसावि
ष्णुः सद्भक्तवत्सलः॥३२॥ ओं ते च नामदैस्तोये स्तुलसीमिश्रिते स्वयं॥ ये छायेस्तापितो विष्णो
र्नाम संश्रावयन्यतः॥३३॥ तस्मान्निखिलपापोयं सम्यक्त्तिं प्राप्नुमर्हति॥ वेछवानुग्रहीयस्मा
न्निरये नैव पच्यते॥३४॥ अकामात्पातकं शुष्कं सकामार्द्रमुदाहृतं॥ आर्द्रं शुष्कं यथा पापं
निरये भोग सन्निधिं॥ प्राप्यते सकृते स्तस्तु स्वर्गसंनिधिनस्तथा॥३५॥ तस्मादकामपु

ण्योयमस्मो निरये त्वसौ॥ विलोक्य निरयान् सर्वान् पापं भोगस्य स्पृष्टिकान्॥३६॥ श्रीकृष्ण उवाच॥
दूरस्थ को गतवति नारदे स सौम्य स्तदावक्य श्रवणविबुद्धशुद्धकर्मा॥ तं विप्रं पुरे नरनम्यात्त्व किं करे
णतान् सर्वान्निरयगणान् प्रदर्शयिष्यन्॥३७॥ इति श्रीपद्मपुराणे कार्तिकमाहात्म्ये सप्तविंशमो
ध्यायः॥२७॥ श्रीकृष्ण उवाच॥ ततो धनेश्वरं नीत्वा निरयान् प्रेतपोऽब्रवीत्॥ संदर्शयिष्यन् ता
न् सर्वान्यमानुज्ञाकरस्तदा॥१॥ प्रेतप उवाच॥ पश्येमान्निरयान् घोरान् धनेश्वर महाभयान्॥
पश्य पापकारानिसंपच्यंते यमकिंकरैः॥२॥ तप्तवालुकनामायं निरयो घोरदर्शनः॥ यस्मि
न्ते दग्धदेहाः क्रंदंते पापकारिणः॥३॥ अतिथिं वैश्वदेवांते क्षुत्क्षामानागतांश्च ये॥ पूजयं
ति न ते ये हि पच्यंते स्वेन कर्मणा॥४॥ गुरुवह्निब्राह्मणान् गांश्च देवान्मूर्धाभिषिक्तवान्॥ ये
ताडयंति पदा ये वै ते निदग्धांघ्रयस्त्विमे॥५॥ षट्भेदस्त्वेष निरयो नानापापिष्ठसंकुलः॥ तथे
वांधतामिस्रोयं द्वितीयो निरयो महान्॥६॥ पश्य सूचिमुखैर्देहा भिद्यंते पापकारिणः॥ कृ
मिभिर्घोररवकैश्च घोरांगैश्च द्विजोत्तम॥७॥ असावपि गृहतः पोद्धाभ्वका कमगपक्षिभिः॥

४० परमर्मभिदो मर्त्याः पच्यंते ये तु पापिनः ॥९॥ तृतीयो क्रकचो घोरो निरयो घोरदर्शनः ॥ यत्रैते क्रक ४०
चैर्मर्त्याः पच्यंते पापकर्मिणः ॥१०॥ असीपत्रवनाख्योत्र षट्प्रकारो ह्ययं पुनः ॥ पतितेष्वाशु भि
र्येर्विर्योगं प्रापयंति हि ॥१०॥ अष्टैश्चैरपि परैः पच्यंते तत्र मानवाः ॥ असीपत्रैश्छिद्यमाना नारक
मीसापलायिताः ॥११॥ पच्यंते पापिनः पश्य क्रंदमाना दुःखसंतताः ॥ अर्गलाख्यो महाघोरश्चतुर्थो नि
रयो ह्ययं ॥१२॥ पश्य नानाविधैः पापैर्बध्यंते यमकिंकरैः ॥ मुद्गराद्यैर्बध्यमानाः क्रंदंते तु ते पा
पिनः ॥१३॥ सज्जनान्ब्राह्मणान्गाश्च निरुंधंतीह ये नराः ॥ कारागृहाद्येस्ते पापाः पच्यंते यम
किंकरैः ॥१४॥ असायपि हि षड्भेदो वधवैघातिभिः स्थितः ॥ कूटशाल्मलिनामानं निरयं पश्य
पंचमं ॥१५॥ यत्र कूटानुमाहेते शाल्मला घातस्थिता द्विज ॥ यत्र घोराभिपच्यंते तेषां तत्ताभि
रमे नराः ॥१६॥ परदारपरद्रव्यपरद्रोहरताः सदा ॥ महाभयमयं पश्य षष्ठं निरयमद्भुतं ॥
॥१७॥ अधोमुखाभिपच्यंते यत्र पापकृतो नराः ॥ अभक्ष्यभक्षकानंदाः पैशुन्यद्रोहसंयुताः ॥१८॥
मज्जमाना बध्यमाना क्रंदंते भैरवान्रवान् ॥ षट्प्रकारो विगंधाढ्यो रसावपिहि संस्थितः ॥१९॥

अंधंतमश्च सप्तमो निरयो घोरदर्शनः ॥ षोडशास्ते तथा दिग्भिर्द्वैर्यैर्घ्नेभैरवविलोकय ॥२०॥ चत्वा
रिंशन्मितानेतानधिकान्पश्य रौरवान् ॥ अकामा सोत्तरं कं श्रुत्वैकसकामाइं मुदा हतं ॥२१॥ महापा
तकिनो यत्र पच्यंते यमकिंकरैः ॥ बहूदैन्यबसहस्राणि सोऽमज्जन निमज्जनैः ॥२२॥ आर्द्रशुष्का
दिभिः पापैर्द्विप्रकारान्नवस्थितान् ॥ चतुराशीतिसंख्याकैः पथकूपैर्देरवस्थितान् ॥२३॥
यत्प्रकीर्णमपांक्तेयं मलीनीकरणं तथा ॥ जातिभ्रंशाकरं तद्वदुपपातकसंज्ञितं ॥२४॥ अतिपा
पं महापापं सप्तधापातकं स्मृतं ॥ एभिस्स्वमनस्तु पच्यंते निरयेषु यथाक्रमं ॥२५॥ कार्तिकव्र
तिभिर्येस्मात्त्वं सर्गोभूतवद्विज ॥ तस्पुण्योपचयादेते निवृत्ता निरयाः खलु ॥२६॥ श्रीकृष्ण
उवाच ॥ दर्शयित्वेति निरयान्प्रेतपस्तमथानयत् ॥ धरणेश्वरं यद्गते लोकं यत्रैश्वाभर
त्तत्र हा ॥२७॥ यनेदस्यानुगः सोयं धनयक्षेति विश्रुतः ॥ तदा स्वयाकेरो तीर्थमयोध्या
यां तु गाधिजः ॥२८॥ एवं प्रभावः खलु कार्तिको यं भुक्तिप्रदो मुक्तिकरश्च यस्मात् ॥ प्रयांसने

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कार्जितपातकाय धृतस्थसंदर्शनतोपि मुक्तिं ॥२९॥ इति श्रीपद्म० कार्तिक० अष्टाविंश
तिमोध्यायः ॥२८॥ सूत उवाच ॥ इत्युक्तो वासुदेवो सौ सत्यभामा मनोहरां प्रियां ॥ सायं संध्या
विधिं कर्तुं जगाम निजमंदिरं ॥१॥ एवं प्रभाव ऋषयो ह्ययं कार्तिकः पापनाशनः ॥ विष्णुप्रीति
४१ करो नित्यं भुक्तिमुक्तिफलप्रदः ॥२॥ हरिजागरणं प्रातःस्नानं तुलसिसेवनं ॥ उद्यापनं दीप ४१
दानं व्रतान्येतानि कार्त्तिके ॥३॥ पंचभिर्व्रतकैरेभिः संपूर्णं कार्त्तिकव्रतं ॥ फलमाप्नोति त
त्प्रोक्तं भुक्तिमुक्तिफलप्रदं ॥४॥ ऋषय ऊचुः ॥ विष्णुप्रियो तिफलदः प्रोक्तोयं व्रतदर्शने ॥ का
र्तिकस्य विधिः सम्यक्कूसे ॥ कामैरथापि वा ॥ लिहासोति विस्मयः ॥५॥ अवश्यमेव कर्त
व्यः पापदुःखविनाशके ॥ मोक्षार्थिभिर्नरैः सम्यक् भोग कामैरथापि वा ॥६॥ एवं स्थि
ते यदा कश्चिद्व्रतस्थः संकटस्थितः ॥ दुर्गारण्ये स्थितो वापि व्याधिभिः परिपीडितः ॥७॥
कथं तेन प्रकर्तव्यं कार्तिकव्रतिकं शुभं ॥ यस्माद्दत्त फलदमसाध्यं सर्वधानरैः ॥८॥

सूत उवाच ॥ एवमापद्गतो यस्तु नरो ऊर्जव्रते स्थितः ॥ कार्तिकव्रतकं तेन कर्तव्यं तु यथा भवेत् ॥९॥
तत्सर्वं कथयिष्येहं शृणुध्वं मुनिसत्तमाः ॥ विष्णोः शिवस्य वा कुर्यादालये हरिजागरं ॥१०॥
शिवविष्णुगृहाभावे सर्वदेवालयेष्वपि ॥ विष्णुनाम प्रबंधानां ॥ यत्नं विष्णुसंनिधौ ॥११॥ गो
सहस्रस्य दानस्य फलमाप्नोति मानवः ॥ वाद्यकः पुरुषश्चापि वाद्ये पेयफलं लभेत् ॥१२॥ सर्व
तीर्थावगाहार्थं नर्तकः फलमाप्नुयात् ॥ सर्वमेतल्लभेत्सम्यक् तेषां द्रव्यप्रदः पुमान् ॥१३॥ भाव
संदर्शनाच्चापि तत्षडंशमवाप्नुयात् ॥ आपद्गतो यदा मर्त्यः स्नानं सर्वासिद्धिमाप्नुयात् ॥१४॥ व्या
धितो वा पुमान् कुर्याद्विष्णोर्नामापमार्जनं ॥ उद्यापनविधिं कर्तुमशक्तो यो व्रते स्थितः ॥१५॥
ब्राह्मणान्भोजयेच्छक्त्या व्रतसंपूर्णहेतवे ॥ अव्यक्तरूपिणो विष्णोः स्वरूपं ब्राह्मणा भुवि ॥१६॥
तत्संतुष्ट्या संतुष्टो विष्णुरेव न संशयः ॥ अशक्तो दीपदानाय परदीपं प्रबोधयेत् ॥१७॥ ते
षां वा रक्षणं कुर्याद्वातादिभ्यः प्रयत्नतः ॥ अभावे तुलसीनां च पूजयेद्वैष्णवान्द्विजान् ॥१८॥
यस्मात्संनिहितो विष्णुः स्वभक्तेष्वेव सर्वदा ॥ तेषामभावे व्रती कुर्याद्ब्राह्मणानां गवामपि ॥१९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सेवां बोधिद्रुमवटयोर्द्वि तस्य पूर्णे हेतवे ॥ ऋषय ऊचुः ॥ कथं त्वयाश्वत्थवटौ गोब्राह्मणसमौ
स्मृतौ ॥ सर्वेभ्योपि तरुभ्यस्तौ कस्मात्सत्यतरौ स्मृतौ ॥ २० ॥ सूत उवाच ॥ अश्वत्थरूपी भगवान्वि
४२ ष्णुरूपीन संशयः ॥ रुद्ररूपीवटस्तद्वत्पलाशो ब्रह्मरूपधृक् ॥ २१ ॥ दर्शनं पूजनं सेवा तेषां पापहरा स्मृ
ता ॥ दुःखापद्व्याधिदुष्टानां विनाशकरणं ध्रुवम् ॥ २२ ॥ ऋषय ऊचुः ॥ कस्माद्वृक्षत्वमापन्ना ब्रह्माविष्णुमहेश्वराः ॥ एतत्कथय धर्मज्ञ संशयो हि महान्हि नः ॥ २३ ॥ सूत उवाच ॥ पार्वतीशिवयोर्देवैः स ४२
रतं कुर्वतोः किल ॥ अग्निर्ब्राह्मणरूपेण प्रेष्य विघ्नकृतः पुरा ॥ २४ ॥ ततस्तु पार्वती क्रुद्धा ह्यशपत्त्रि
दिवौकसः ॥ रतोत्सवसुखभ्रंशात्कंपमानाऽरुषा तदा ॥ २५ ॥ पार्वत्युवाच ॥ कृमिकीटपतंगाद्या जानं
ति स्मरजं सुखं ॥ तद्विघ्नकारिणो देवा ह्यबीजास्त्वमवाप्स्यथ ॥ २६ ॥ श्रीसूत उवाच ॥ एवं सा पार्वती देवा
नशपत्क्रुद्धमानसा ॥ तस्माद्वृक्षत्वमापन्नाः सर्वे देवगणाः किल ॥ २७ ॥ तस्माच्छ्वत्थो विष्णुमहेश्व
रावभौ बभूवतुर्बोधिवटौ सुपूजितौ ॥ बोधिस्तथा शार्किदिनं विनैव अस्पृश्यतामर्कजदृष्टियोगात् ॥
॥ २८ ॥ इति श्रीपद्मपुराणे कार्तिकमाहात्म्ये एकोनत्रिंशतितमोऽध्यायः ॥ ॥ ऋषय ऊचुः ॥ अस्पृ

श्यत्वं कथं याताः सूत बोधितरुः स्वयम् ॥ स्पृश्यत्वं च कथं याताः स्वधायां शनिवासरे ॥ १ ॥ श्रीसूत उवाच ॥ समुद्र
मथनाद्यानि रत्नान्यापुः सुरोत्तमाः ॥ श्रियं च कौस्तुभं तेषां विष्णवे प्रददुः सुराः ॥ २ ॥ यावद्देवी चकारासौ ल
क्ष्मीं भार्यार्थमात्मनः ॥ तावद्विज्ञापयामास लक्ष्मीस्तं चक्रपाणिनं ॥ ३ ॥ लक्ष्मीरुवाच ॥ असंस्कृत्य कथं
ज्येष्ठां कनिष्ठां परिणीयसे ॥ तस्मान्ममाग्रजां मे तामलक्ष्मीं मधुसूदन ॥ ४ ॥ विवाहय ततो मां च श्रीदे
ष धर्मः सनातनः ॥ सूत उवाच ॥ इति तद्वचनं श्रुत्वा स विष्णुर्लोकभावनः ॥ ५ ॥ उद्दालकाय मुनये सुदीर्घ
तपसे तदा ॥ अलक्ष्म्याख्यानुरोधेन तामलक्ष्मीं ददौ किल ॥ ६ ॥ स्थूलास्यां शुभ्रदंतां रक्तासां बिभ्रतीं
तनुं ॥ विकृतां रक्तनयनां रूक्षपिंगशिरोरुहां ॥ ७ ॥ स मुनिर्विष्णुवाक्येन तामुद्वाहस्व माश्रमं ॥ वेद
ध्वनिसमाकुलं मानयामास धर्मवित् ॥ ८ ॥ होमधूमं च सुगंधाढ्यं वेदघोषनिनादितं ॥ आश्रमं तं समा
लोक्य व्यथिता सा तमब्रवीत् ॥ ९ ॥ ज्येष्ठोवाच ॥ नहि मे सोऽनुरूपोऽयं वेदध्वनियुतो मतः ॥ नात्र तिष्ठा
मि भो ब्रह्मन्नन्यत्स्वान्यत्र मां भवं ॥ १० ॥ उद्दालक उवाच ॥ कथं नायासि किं चात्र वर्तते समतं तव ॥
तव योग्यावसतिः का भवेच्च वद स्वतः ॥ ११ ॥ ज्येष्ठोवाच ॥ वेदध्वनिर्भवेद्यस्मिन्नतिथीनां च पूजनं ॥
यज्ञदानादिकं चापि नैव तत्र वसाम्यहं ॥ १२ ॥ उद्दालकोऽपि मीनीतिकुरो धर्मयुक्तोऽप्रियं वदः ॥ गुरुदेवा

चेनं यत्रमेव तत्रसाम्यहं ॥१३॥ श्रीरा श्रीगृहे यस्मिन्दंपत्योः कलहो भवेत् ॥ निराशा यांत्यतिथयस्त
स्मिंस्थाने वसाम्यहं ॥१४॥ दुरोदररता यत्र परद्रव्यापहारिणः ॥ परदाररताश्चापि तत्रस्थाने रतिर्ने
म ॥१५॥ वृद्धानां जनयित्रीणां यत्र स्यादपमानता ॥ निष्ठुरं भाषणं यत्र तस्मिन्स्थाने वसाम्यहं ॥१६॥
४३ इति तद्वचनं श्रुत्वा विषण्णवदनोऽभवत् ॥ उद्दालकस्ततश्चिंत्ये वीक्ष्य स्वस्थानचोचितयान् ॥१७॥
सोगच्छद्घमत्तत्रास्य पूजामालोक्य साब्रवीत् ॥ नयामीति ततः सोपि त्वमनन्धमपरोभवेत् ॥१८॥ उ ४३
द्दालकस्ततो वाक्यं तामलक्ष्मीमुवाच ह ॥ अश्वत्थवृक्षमूलेस्मिन्नलक्ष्मीः स्थीयतां त्वया ॥१९॥ आ
वासस्थानमालोक्य यावद्धास्याम्यहं पुनः ॥ स्तत उवाच ॥ इति तां तत्र संस्थाप्य तगामोद्दालकस्तदा ॥
॥२०॥ प्रतीक्ष्य सा चिरं तत्र तदा तं न ददर्श सा ॥ तदारुरोदकरुणं भर्त्रा त्यागेन दुःखिता ॥२१॥ ततस्तस्याः
क्रंदितं लक्ष्मीर्वैकुंठभवने श्रणोत् ॥ तदा विज्ञापयामास विष्णुमुद्विग्नमानसा ॥२२॥ लक्ष्मीरुवाच ॥
स्वामिन्नमदभागिनीज्येष्ठा भर्त्रा त्यागेन दुःखिता ॥ तामाश्वासयितुं याहि कृपालो यद्यहं प्रिया ॥२३॥
स्तत उवाच ॥ लक्ष्मासह ततो विष्णुस्तत्रागच्छत्कृपानिधिः ॥ आश्वासयदलक्ष्मीं तामिदं वचनम

ब्रवीत् ॥२४॥ विष्णुरुवाच ॥ अश्वत्थवृक्षमासाद्य त्वमलक्ष्मीः स्थिराभव ॥ ममांशसंभवो ह्येष आवासस्ते
मया कृतः ॥२५॥ प्रत्यब्दं येर्चयिष्यंति त्वां ज्येष्ठां गृहधर्मिणः ॥ तेषां गृहे कमलिन्येषा स्थिरा भवति सर्वदा ॥
॥२६॥ इति हास्मिन्मंत्रिसंनरोभ स्थाश्रणोति यः ॥ स दीर्घमायुरारोग्यं धनधान्यं च विंदति ॥२७॥ इति
४४ श्रीपद्मपुराणे कार्तिकमाहात्म्ये ज्येष्ठाकनिष्ठोपाख्याने त्रिंशतितमोऽध्यायः ॥ श्रीरामचंद्रार्पणमस्तु ॥ ४४
श्रीगोपालकृष्णार्पणमस्तु ॥ श्री ॥ ७ ॥ ७ ॥ ७ ॥ श्रीशुभं भवतु ॥ शके १७ वर्षे पिंगल
नामसंवत्सरे दक्षिणायने शरदृतौ आश्विनशुद्धद्वादश्यां भौमवासरे इदं पुस्तकं समाप्तं ॥ ॥ श्रीरा
मो जयति ॥ स्वार्थं परोपकारार्थं च ॥ अदृष्टदोषात्स्मृतिविभ्रमाद्वा यदर्थहीनं लिखितं मया
त्र ॥ तन्मार्गयित्वा परशोध्य नीयं कोपं न कुर्यात्खलु लेखकस्य ॥१॥ अहो भाग्यमहो भाग्यं नंद
गोपव्रजौकसां ॥ यन्मित्रं परमानंदं पूर्णं ब्रह्म सनातनम् ॥२॥ श्रीराम ॥ ७ ॥ ७ ॥ ७

[OrderDescription]
,CREATED=19.07.19 15:41
,TRANSFERRED=2019/07/19 at 15:54:45
,PAGES=45
,TYPE=STD
,NAME=S0001034
,Book Name=M-1983-KANIRKMHATMY
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection